# ॥ बृहदारण्यकोपनिषत् सस्वरा ॥

.. Brihadaranyaka Upanishad with Vedic Accents ..

sanskritdocuments.org

November 28, 2016

# .. Brihadaranyaka Upanishad with Vedic Accents ..

# ॥ बृहदारण्यकोपनिषत् सस्वरा ॥

## Sanskrit Document Information

Text title : bRihadAraNyakopaniShat

File name : bri.itx

Category : upaniShat

Location : doc_upanishhat

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/religion/hinduism

Transliterated by : Marcos Albino

Latest update : January 31, 1997

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 28, 2016

*sanskritdocuments.org*

# ॥ बृहदारण्यकोपनिषत् सस्वरा ॥

## ch1

## ch1 = hbM 10.6.4.1 = hbk16.3.1.1-2

### pMk1

उषा वा अश्वस्य मेध्यस्य शिरः,
सूर्यश्चक्षुः
वातः प्राणो,
व्यात्तमग्निर्वैश्वानरः,
संवत्सर आत्माश्वस्य मेध्यस्य द्यौष् पृष्ठम्
अन्तरिक्षमुदरं,
पृथिवी पाजस्यं,
दिशः पार्श्वे,
अवान्तरदिशः पर्शव,
ऋतवोऽङ्गानि,
मासाश्चार्धमासाश्च पर्वाणि
अहोरात्राणि प्रतिष्ठा,
नक्षत्राण्यस्थीनि,
नभो माꣳसानि
ऊवध्यꣳ सिकताः,
सिन्धवो गुदा,
यकृच्च क्लोमानश्च पर्वता,
ओषधयश्च वनस्पतयश्च लोमानि
उद्यन्पूर्वार्धो,
निम्लोचञ्जघनार्धो,

यद्विजृम्भते,
तद्विद्योतते,
यद्विधूनुते,
तत्स्तनयति,
यन्मेहति,
तद्वर्षति,
वागेवास्य वाक् ।

pMk2

अहर्वा अश्वं पुरस्तान्महिमान्वजायत,
तस्य पूर्वे समुद्रे योनी;
रात्रिरेनं पश्चान्महिमान्वजायत,
तस्यापरे समुद्रे योनिः
एतौ वा अश्वं महिमानावभितः सम्बभूवतुः ।
हयो भूत्वा देवानवहद्
वाजी गन्धर्वान्
अर्वासुरान्
अश्वो मनुष्यान्त् ।
समुद्र एवास्य बन्धुः,
समुद्रो योनिः ।

ch2 = hbM 10.6.5.1-3 = hbk16.3.2.1-7

pMk1

नैवेह किं चनाग्र आसीन् ।
मृत्युनैवेदमावृतमासीदशनाययाशनाया हि मृत्युः ।
तन्मनोऽकुरुतात्मन्वी स्यामिति ।

सोऽर्चन्नचरत् ।
तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति ।
तदेवार्क्यस्यार्कत्वम् ।
क१॒ ह वा अस्मै भवति,
य एवमेतदर्क्यस्यार्कत्वं वेद ।

pMk2

आपो वा अर्कः ।
तद्यदपा१॒ शर आसीत्
तत्समहन्यत,
सा पृथिव्यभवत् ।
तस्यामश्राम्यत् ।
तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्तताग्निः ।

pMk3

स त्रेधात्मानं व्यकुरुतादित्यं तृतीयं,
वायुं तृतीय१॒ ।
स एष प्राणस् त्रेधाविहितः ।
तस्य प्राची दिक्शिरोऽसौ चासौ चेर्मा३उ
अथास्य प्रतीची दिक्पुच्छम्
असौ चासौ च सक्थ्यौ;
दक्षिणा चोदीची च पार्श्वे,
द्यौष् पृष्ठम्
अन्तरिक्षमुदरम्
इयमुरः,
स एषोऽप्सु प्रतिष्ठितो ।
यत्र क्व चैति,
तदेव प्रतितिष्ठत्य् एवं विद्वान् ।

## pMk4

सोऽकामयतः
द्वितीयो म आत्मा जायेतेति ।
स मनसा वाचं मिथुनꣳ समभवदशनायां मृत्युः ।
तद्यद्रेत आसीत्
स संवत्सरोऽभवन् ।
न ह पुरा ततः संवत्सर आस ।
तमेतावन्तं कालमबिभर्यावान्त्संवत्सरः ।
तमेतावतः कालस्य परस्तादसृजत ।
तं जातमभिव्याददात्;
स भाणकरोत्
सैव वागभवत् ।

## pMk5

स ऐक्षतः
यदि वा इममभिमꣳस्ये,
कनीयोऽन्नं करिष्य इति ।
स तया वाचा तेनात्मनेदꣳ सर्वमसृजत,
यदिदं किञ्चर्चो यजूꣳषि सामानि
छन्दाꣳसि यज्ञान्प्रजां पशून् ।
स यद्-यदेवासृजत,
तत्-तदत्तुमध्रियत ।
सर्वं वा अत्तीति,
तददितेरदितित्वꣳ ।
सर्वस्यात्ता भवति,
सर्वमस्यान्नं भवति,
य एवमेतददितेरदितित्वं वेद ।

## pMk6

सोऽकामयतः
भूयसा यज्ञेन भूयो यजेयेति ।
सोऽश्राम्यत्
स तपोऽतप्यत ।
तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत् ।
प्राणा वै यशो वीर्यम् ।
तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत;
तस्य शरीर एव मन आसीत् ।

## pMk7

सोऽकामयतः
मेध्यं म इदꣳ स्याद्
आत्मन्व्यनेन स्यामिति ।
ततोऽश्वः समभवद् ।
यदश्वत्
तन्मेध्यमभूदिति ।
तदेवाश्वमेधस्याश्वमेधत्वम् ।
एष ह वा अश्वमेधं वेद,
य एनमेवं वेद ।

## pM8/k7

तमनवरुध्येवामन्यत ।
तꣳ संवत्सरस्य परस्तादात्मन आलभत,
पशून्देवताभ्यः प्रत्यौहत् ।
तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्त ।
एष वा अश्वमेधो य एष तपति;
तस्य संवत्सर आत्मायमग्निरर्कः

तस्येमे लोका आत्मानः ।
तावेतावर्काश्वमेधौ,
सो पुनरेकैव देवता भवति,
मृत्युरेवाप पुनर्मृत्युं जयति,
नैनं मृत्युराप्नोति,
मृत्युरस्यात्मा भवति
सर्वमायुरेति
एतासां देवतानामेको भवति,
य एवं वेद ।

ch3 = hbM 14.4.1.1-33 = hbk16.3.3.1-23

pMk1

द्वया ह प्राजापत्या,
देवाश्चासुराश्च ।
ततः कानीयसा एव देवा,
ज्यायसा असुराः ।
त एषु लोकेष्वस्पर्धन्त ।

pMk2

ते ह देवा ऊचुः
हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ।

pM3/k2

ते ह वाचमूचुः
त्वं न उद्गायेति ।
तथेति ।
तेभ्यो वागुदगायद् ।
यो वाचि भोगस् तं देवेभ्य आगायद्
यत्कल्याणं वदति तदात्मने ।
तेऽविदुः
अनेन वै न उद्गात्रात्येष्यन्तीति ।
तमभिद्रुत्य पाप्मनाविध्यन् ।
स यः स पाप्मा यदेवेदमप्रतिरूपं वदति,
स एव स पाप्मा ।

pM4/k3

अथ ह प्राणमूचुः
त्वं न उद्गायेति ।
तथेति ।
तेभ्यः प्राण उदगायद् ।
यः प्राणे भोगस् तं देवेभ्य आगायद्
यत्कल्याणं जिघ्रति तदात्मने ।
तेऽविदुः
अनेन वै न उद्गात्रात्येष्यन्तीति ।
तमभिद्रुत्य पाप्मनाविध्यन् ।
स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति,
स एव स पाप्मा ।

pM5/k4

अथ ह चक्षुरूचुः
त्वं न उद्गायेति ।

तथेति ।
तेभ्यश्चक्षुरुदगायद् ।
यश्चक्षुषि भोगस् तं देवेभ्य आगायद्
यत्कल्याणं पश्यति तदात्मने ।
तेऽविदुः
अनेन वै न उद्गात्रात्येष्यन्तीति ।
तमभिद्रुत्य पाप्मनाविध्यन् ।
स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति,
स एव स पाप्मा ।

pM6/k5

अथ ह श्रोत्रमूचुः
त्वं न उद्गायेति ।
तथेति ।
तेभ्यः श्रोत्रमुदगायद् ।
यः श्रोत्रे भोगस् तं देवेभ्य आगायद्
यत्कल्याणꣳ शृणोति तदात्मने ।
तेऽविदुः
अनेन वै न उद्गात्रात्येष्यन्तीति ।
तमभिद्रुत्य पाप्मनाविध्यन् ।
स यः स पाप्मा यदेवेदमप्रतिरूपꣳ शृणोति,
स एव स पाप्मा ।

pM7/k5

अथ ह मन ऊचुः
त्वं न उद्गायेति ।
तथेति ।
तेभ्यो मन उदगायद् ।

यो मनसि भोगस् तं देवेभ्य आगायद्
यत्कल्याणꣳ सङ्कल्पयति तदात्मने ।
तेऽविदुः
अनेन वै न उद्गात्रात्येष्यन्तीति ।
तमभिद्रुत्य पाप्मनाविध्यन्त् ।
स यः स पाप्मा यदेवेदमप्रतिरूपꣳ सङ्कल्पयति,
स एव स पाप्मैवमु खल्वेता
देवताः पाप्मभिरुपासृजन्न्
एवमेनाः पाप्मनाविध्यन् ।

pM8/k7

अथ हेममासन्यं प्राणमूचुः
त्वं न उद्गायेति ।
तथेति ।
तेभ्य एष प्राण उदगायत् ।
तेऽविदुः
अनेन वै न उद्गात्रात्येष्यन्तीति ।
तमभिद्रुत्य पाप्मनाविव्यत्सन्त् ।
स यथाश्मानमृत्वा लोष्टो
विध्वꣳसेतैवꣳ हैव
विध्वꣳसमाना विष्वञ्चो विनेशुः ।
ततो देवा अभवन्
परासुरा ।
भवत्य् आत्मना,
परास्य द्विषन्भ्रातृव्यो भवति,
य एवं वेद ।

pM9/k8

ते होचुः
क्व नु सोऽभूद्
यो न इत्थमसक्तेति ।
अयमास्येऽन्तरिति,
सोऽयास्य;
आङ्गिरसो,
अङ्गानाꣳ हि रसः ।

pM10/k9

सा वा एषा देवता दूर्नाम,
दूरꣳ ह्यस्या मृत्युः ।
दूरꣳ ह वा अस्मान्मृत्युर्भवति,
य एवं वेद ।

pM11/k10

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य,
यत्रासां दिशामन्तः
तद्गमयां चकार,
तदासां पाप्मनो विन्यदधात् ।
तस्मान्न जनमियान्
नान्तमियान्
नेत्पाप्मानं मृत्युमन्ववायानीति ।

pM12/k11

सा वा एषा देवतैतासां देवतानां
पाप्मानं मृत्युमपहत्याथैना मृत्युमत्यवहत् ।

pM13/k12

सा वै वाचमेव प्रथमामत्यवहत् ।
सा यदा मृत्युमत्यमुच्यत,
सोऽग्निरभवत्;
सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ।

pM14/k13

अथ प्राणमत्यवहत् ।
स यदा मृत्युमत्यमुच्यत,
स वायुरभवत्;
सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ।

pM15/k14

अथ चक्षुरत्यवहत् ।
तद्यदा मृत्युमत्यमुच्यत,
स आदित्योऽभवत्;
सोऽसावादित्यः परेण मृत्युमतिक्रान्तस् तपति ।

pM16/k15

अथ श्रोत्रमत्यवहत् ।
तद्यदा मृत्युमत्यमुच्यत,
ता दिशोऽभवन्;
ता इमा दिशः परेण मृत्युमतिक्रान्ताः ।

pM17/k16

अथ मनोऽत्यवहत् ।
तद्यदा मृत्युमत्यमुच्यत,
स चन्द्रमा अभवत्;
सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भाति ।
एवꣳ ह वा एनमेषा देवता मृत्युमतिवहति,
य एवं वेद ।

pM18/k17

अथात्मनेऽन्नाद्यमागायद् ।
यद्धि किञ्चान्नमद्यते,
अनेनैव तदद्यत;
इह प्रतितिष्ठति ।

pM19/k18

ते देवा अब्रुवन्न्
एतावद्वा इदꣳ सर्वं यदन्नं,
तदात्मन आगासीः
अनु नोऽस्मिन्नन्न आभजस्वेति ।
ते वै माभिसंविशतेति ।
तथेति ।
तꣳ समन्तं परिण्यविशन्त ।
तस्माद्यदनेनान्नमत्ति,
तेनैतास् तृप्यन्ति ।
एवꣳ ह वा एनꣳ स्वा अभिसंविशन्ति,
भर्ता स्वानाꣳ श्रेष्ठः पुरएता भवत्यन्नादोऽधिपतिः
य एवं वेद ।

pM20/k18

य उ हैवंविदꣳ स्वेषु प्रतिप्रतिर्बुभूषति,
न हैवालं भार्येभ्यो भवति
अथ य एवैतमनुभवति,
यो वैतमनु भार्यान्बुभूर्षति,
स हैवालं भार्येभ्यो भवति ।

pM21/k19

सोऽयास्य आङ्गिरसो,
अङ्गानाꣳ हि रसः ।
प्राणो वा अङ्गानाꣳ रसः ।
प्राणो हि वा अङ्गानाꣳ रसः
तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति,
तदेव तच्छुष्यति
एष हि वा अङ्गानाꣳ रसः ।

pM22/k20

एष उ एव बृहस्पतिः
वाग्वै बृहती,
तस्या एष पतिः
तस्मादु बृहस्पतिः ।

pM23/k21

एष उ एव ब्रह्मणस्पतिः
वाग्वै ब्रह्म,
तस्या एष पतिः
तस्मादु ब्रह्मणस्पतिः ।

pM24/k22

एष उ एव साम;
वाग्वै सामैष सा चामश्चेति,
तत्साम्नः सामत्वम् ।
यद्वेव समः प्लुषिणा,
समो मशकेन,
समो नागेन,
सम एभिस् त्रिभिर्लोकैः,
समोऽनेन सर्वेण,
तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ सलोकतां,
य एवमेतत्साम वेद ।

pM25/k23

एष उ वा उद्गीथः ।
प्राणो वा उत्
प्राणेन हीदꣳ सर्वमुत्तब्धम् ।
वागेव गीथोच्च गीथा चेति,
स उद्गीथः ।

pM26/k24

तद्धापि ब्रह्मदत्तश्चैकितानेयो
राजानं भक्षयन्नुवाचायं त्यस्य राजा मूर्धानं विपातयताद्
यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति ।
वाचा च ह्य् एव स प्राणेन चोदगायदिति ।

pM27/k25

तस्य हैतस्य साम्नो यः स्वं वेद,
भवति हास्य स्वम् ।
तस्य वै स्वर एव स्वम् ।
तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत,
तया वाचा स्वरसम्पन्नयार्त्विज्यं कुर्यात् ।
तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एवाथो
यस्य स्वं भवति ।
भवति हास्य स्वं,
य एवमेतत्साम्नः स्वं वेद ।

pM28/k26

तस्य हैतस्य साम्नो यः सुवर्णं वेद,
भवति हास्य सुवर्णम् ।
तस्य वै स्वर एव सुवर्णम् ।
भवति हास्य सुवर्णं,
य एवमेतत्साम्नः सुवर्णं वेद ।

pM29/k27

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद,
प्रति ह तिष्ठति ।
तस्य वै वागेव प्रतिष्ठा,
वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयते,
अन्न इत्य् उ हैक आहुः ।

pM30/k28

अथातः पवमानानामेवाभ्यारोहः ।
स वै खलु प्रस्तोता साम प्रस्तौति ।

स यत्र प्रस्तुयात्
तदेतानि जपेद्
असतो मा सद्गमय
तमसो मा ज्योतिर्गमय,
मृत्योर्मामृतं गमयेति ।

pM31/k28

स यदाहासतो मा सद्गमयेति,
मृत्युर्वा असत्
सदमृतम्
मृत्योर्मामृतं गमयामृतं मा कुर्वित्य् एवैतदाह ।

pM32/k28

तमसो मा ज्योतिर्गमयेति,
मृत्युर्वै तमो,
ज्योतिरमृतम्
मृत्योर्मामृतं गमयामृतं मा कुर्वित्य् एवैतदाह ।
मृत्योर्मामृतं गमयेति,
नात्र तिरोहितमिवास्ति ।

pM33/k28

अथ यानीतराणि स्तोत्राणि,
तेष्वात्मनेऽन्नाद्यमागायेत्;
तस्मादु तेषु वरं वृणीत,
यं कामं कामयेत,
तꣳ ।
स एष एवंविदुद्गातात्मने वा यजमानाय

वा यं कामं कामयते,
तमागायति ।
तद्धैतल् लोकजिदेव,
न हैवालोक्यताया आशास्ति,
य एवमेतत्साम वेद ।

ch4 = hbM 14.4.2.1-31 = hbk16.3.4.1-17

pMk1

आत्मैवेदमग्र आसीत्पुरुषविधः ।
सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत् ।
सोऽहमस्मीत्यग्रे व्याहरत् ।
ततोऽहन्नामाभवत् ।
तस्मादप्य् एतर्ह्य् आमन्त्रितोः
अहमयमित्य् एवाग्र उक्त्वाथान्यन्नाम
प्रब्रूते यदस्य भवति ।

pM2/k1

स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्
तस्मात्पुरुष ।
ओषति ह वै स तं,
योऽस्मात्पूर्वो बुभूषति,
य एवं वेद ।

pM3/k2

सोऽबिभेत्;
तस्मादेकाकी बिभेति ।
स हायमीक्षां चक्रे
यन्मदन्यन्नास्ति,
कस्मान्नु बिभेमीति ।
तत एवास्य भयं वीयाय ।
कस्माद्ध्यभेष्यद्
द्वितीयाद्वै भयं भवति ।

pM4/k3

स वै नैव रेमे;
तस्मादेकाकी न रमते ।
स द्वितीयमैच्छत् ।
स हैतावानास यथा स्त्रीपुमाꣳसौ सम्परिष्वक्तौ ।

pM5/k3

स इममेवात्मानं द्वेधापातयत्;
ततः पतिश्च पत्नी चाभवताम् ।
तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यः ।
तस्मादयमाकाशः स्त्रिया पूर्यत एव ।
ताꣳ समभवत्
ततो मनुष्या अजायन्त ।

pM6/k4

सो हेयमीक्षां चक्रे
कथं नु मात्मन एव जनयित्वा सम्भवति ।
हन्त तिरोऽसानीति ।

pM7/k4

सा गौरभवद्
वृषभ इतरस्;
ताꣳ समेवाभवत्
ततो गावोऽजायन्त ।

pM8/k4

वडवेतराभवद्
अश्ववृष इतरो;
गर्दभीतरा,
गर्दभ इतरस्;
ताꣳ समेवाभवत्
तत एकशफमजायत ।

pM9/k4

अजेतराभवद्
बस्त इतरो;
अविरितरा,
मेष इतरस्;
ताꣳ समेवाभवत्
ततोऽजावयोऽजायन्तैवमेव यदिदं किञ्च मिथुनमा
पिपीलिकाभ्यः
तत्सर्वमसृजत ।

pM10/k5

सोऽवेद्
अहं वाव सृष्टिरस्मि
अहꣳ हीदꣳ सर्वमसृक्षीति ।
ततः सृष्टिरभवत् ।
सृष्ट्याꣳ हास्यैतस्यां भवति,
य एवं वेद ।

pM11/k6

अथेत्यभ्यमन्थत् ।
स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत ।
तस्मादेतदुभयमलोमकमन्तरतो,
अलोमका हि योनिरन्तरतः ।

pM12/k6

तद्यदिदमाहुः
अमुं यजामुं यजेत्य् एकैकं देवम्
एतस्यैव सा विसृष्टिः
एष उ ह्य् एव सर्वे देवा ।

pM13/k6

अथ यत्किञ्चेदमार्द्रं,
तद्रेतसोऽसृजत;
तदु सोम ।
एतावद्वा इदꣳ सर्वमन्नं चैवान्नादश्च;
सोम एवान्नम्
अग्निरन्नादः ।

pM14/k6

सैषा ब्रह्मणोऽतिसृष्टिः
यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः
सन्नमृतानसृजत,
तस्मादतिसृष्टिः
अतिसृष्ट्याꣳ हास्यैतस्यां भवति,
य एवं वेद ।

pM15/k7

तद्धेदं तर्ह्यव्याकृतमासीत् ।
तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदꣳरूप इति ।
तदिदमप्य् एतर्हि नामरूपाभ्यामेव
व्याक्रियत असौ नामायमिदꣳरूप इति ।

pM16/k7

स एष इह प्रविष्ट आ नखाग्रेभ्यो ।
यथा क्षुरः क्षुरधानेऽवहितः स्याद्
विश्वम्भरो वा विश्वम्भरकुलाये,
तं न पश्यन्ति
अकृत्स्नो हि सः;

pM17/k7

प्राणन्नेव प्राणो नाम भवति,
वदन्वाक्
पश्यंश्चक्षुः,
शृण्वङ्छ्रोत्रं,

मन्वानो मनः ।
तान्यस्यैतानि कर्मनामान्य् एव ।
स योऽत एकैकमुपास्ते,
न स वेदाकृत्स्नो ह्य् एषोऽत एकैकेन भवति ।

pM18/k7

आत्मेत्य् एवोपासीतात्र ह्य् एते सर्व एकं भवन्ति ।
तदेतत्पदनीयमस्य सर्वस्य
यदयमात्मानेन ह्य् एतत्सर्वं वेद ।
यथा ह वै पदेनानुविन्देद्
एवं कीर्तिꣳ श्लोकं विन्दते,
य एवं वेद ।

pM19/k8

तदेतत्प्रेयः पुत्रात्
प्रेयो वित्तात्
प्रेयोऽन्यस्मात्सर्वस्माद्
अन्तरतरं,
यदयमात्मा ।
स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्
प्रियꣳ रोत्स्यतीतीश्वरो ह तथैव स्याद् ।
आत्मानमेव प्रियमुपासीत ।
स य आत्मानमेव प्रियमुपास्ते,
न हास्य प्रियं प्रमायुकं भवति ।

pM20/k9

तदाहुः
यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते,
किमु तद्ब्रह्मावेद्
यस्मात्तत्सर्वमभवदिति ।

pM21/k10

ब्रह्म वा इदमग्र आसीत् ।
तदात्मानमेवावेद्
अहं ब्रह्मास्मीति;
तस्मात्तत्सर्वमभवत् ।
तद्यो-यो देवानां प्रत्यबुध्यत,
स एव तदभवत्
तथर्षीनां,
तथा मनुष्याणाम् ।

pM22/k10

तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेः
अहं मनुरभवꣳ सूर्यश्चेति ।
तदिदमप्य् एतर्हि य एवं वेदाहं ब्रह्मास्मीति,
स इदꣳ सर्वं भवति,
तस्य ह न देवाश्चनाभूत्या ईशत,
आत्मा ह्य् एषाꣳ स भवति ।
अथ योऽन्यां देवतामुपास्तेः
अन्योऽसाउ
अन्योऽहमस्मीति,
न स वेद ।
यथा पशुरेवꣳ स देवानाम् ।
यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युः

एवमेकैकः पुरुषो देवान्भुनक्ति ।
एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति,
किमु बहुषु;
तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ।

pM23/k11

ब्रह्म वा इदमग्र आसीदेकमेव ।
तदेकꣳ सन्न व्यभवत् ।
तच्छ्रेयो रूपमत्यसृजत क्षत्रं,
यान्य् एतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो
रुद्रः पर्जन्यो यमो मृत्युरीशान इति ।
तस्मात्क्षत्रात्परं नास्ति;
तस्माद्! ब्राह्मणः क्षत्रियं अधस्तादुपास्ते राजसूये ।
क्षत्र एव तद्यशो दधाति,
सैषा क्षत्रस्य योनिर्यद्ब्रह्म ।
तस्माद्यद्यपि राजा परमतां गच्छति,
ब्रह्मैवान्तत उपनिश्रयति स्वां योनिम् ।
य उ एनꣳ हिनस्ति,
स्वाꣳ स योनिमृच्छति ।
स पापीयान्भवति,
यथा श्रेयाꣳसꣳ हिꣳसित्वा ।

pM24/k12

स नैव व्यभवत् ।
स विशमसृजत,
यान्य् एतानि देवजातानि गणश आख्यायन्ते,
वसवो रुद्रा आदित्या विश्वे देवा मरुत इति ।

pM25/k13

स नैव व्यभवत् ।
स शौद्रं वर्णमसृजत पूषणम् ।
इयं वै पूषेयꣳ हीदꣳ सर्वं
पुष्यति यदिदं किञ्च ।

pM26/k14

स नैव व्यभवत् ।
तच्छ्रेयो रूपमत्यसृजत धर्मम् ।
तदेतत्क्षत्रस्य क्षत्रं यद्धर्मः ।
तस्माद्धर्मात्परं नास्ति ।
अथो अबलीयान्बलीयाꣳसमाशꣳसते
धर्मेण यथा राज्ञैवम् ।
यो वै स धर्मः,
सत्यं वै तत् ।
तस्मात्सत्यं वदन्तमाहुः
धर्मं वदतीति,
धर्मं वा वदन्तꣳ:
सत्यं वदतीति
एतद्ध्य् एवैतदुभयं भवति ।

pM27/k15

तदेतद्ब्रह्म क्षत्रं विट् शूद्रः ।
तदग्निनैव देवेषु ब्रह्माभवद्
ब्राह्मणो मनुष्येषु,
क्षत्रियेण क्षत्रियो,
वैश्येन वैश्यः,
शूद्रेण शूद्रः ।

तस्मादग्नावेव देवेषु लोकमिच्छन्ते,
ब्राह्मणे मनुष्येषु
एताभ्याꣳ हि रूपाभ्यां ब्रह्माभवत् ।

pM28/k15

अथ यो ह वा अस्माल् लोकात्स्वं लोकमदृष्ट्वा प्रैति,
स एनमविदितो न भुनक्ति;
यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतम् ।
यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति,
तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत ।
स य आत्मानमेव लोकमुपास्ते,
न हास्य कर्म क्षीयते ।
अस्माद्ध्य् एवात्मनो यद्-यत्कामयते,
तत्-तत्सृजते ।

pM29/k16

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः;
स यज् जुहोति,
यद्यजते तेन देवानां लोको;
अथ यदनुब्रूते,
तेनर्षीणाम्;
अथ यत्प्रजामिच्छते,
यत्पितृभ्यो निपृणाति,
तेन पितॄणाम्;
अथ यन्मनुष्यान्वासयते,
यदेभ्योऽशनं ददाति,
तेन मनुष्याणाम्;
अथ यत्पशुभ्यस् तृणोदकं विन्दति,

तेन पशूनां;
यदस्य गृहेषु श्वापदा वयाꣳस्य् आ
पिपीलिकाभ्य उपजीवन्ति,
तेन तेषां लोको ।
यथा ह वै स्वाय लोकायारिष्टिमिच्छेद्
एवꣳ हैवंविदे सर्वदा सर्वाणि भूतान्यरिष्टिमिच्छन्ति ।
तद्वा एतद्विदितं मीमाꣳसितम् ।

pM30/k17

आत्मैवेदमग्र आसीद्
एक एव ।
सोऽकामयतः
जाया मे स्याद्
अथ प्रजायेयाथ वित्तं मे स्याद्
अथ कर्म कुर्वीयेति ।
एतावान्वै कामो नेच्छꣳश्चनातो भूयो विन्देत् ।
तस्मादप्य् एतर्ह्य् एकाकी कामयतेः
जाया मे स्याद्
अथ प्रजायेयाथ वित्तं मे स्याद्
अथ कर्म कुर्वीयेति ।
स यावदप्य् एतेषामेकैकं न प्राप्नोति
अकृत्स्न एव तावन्मन्यते ।
तस्यो कृत्स्नता ।

pM31/k17

मन एवास्यात्मा;
वाग्जाया;
प्राणः प्रजा;

चक्षुर्मानुषं वित्तं,
चक्षुषा हि तद्विन्दति;
श्रोत्रं दैवं,
श्रोत्रेण हि तच्छृणोति
आत्मैवास्य कर्मात्मना हि कर्म करोति ।
स एष पाङ्क्तो यज्ञः,
पाङ्क्तः पशुः,
पाङ्क्तः पुरुषः,
पाङ्क्तमिद꣡ꣳ सर्वं यदिदं किञ्च ।
तदिद꣡ꣳ सर्वमाप्नोति,
य एवं वेद ।

ch5 = hbM 14.4.3.1-34= hbk16.3.5.1-23

pMk1

यत्सप्तान्नानि मेधया
तपसाजनयत्पितै-
-कमस्य साधारणं,
द्वे देवानभाजयत् ।
त्रीण्य् आत्मनेऽकुरुत,
पशुभ्य एकं प्रायच्छत्;
तस्मिन्त्सर्वं प्रतिष्ठितं,
यच्च प्राणिति यच्च न ।
कस्मात्तानि न क्षीयन्ते,
अद्यमानानि सर्वदा ।
यो वै तामक्षितिं वेद,
सोऽन्नमत्ति प्रतीकेन,
स देवानपिगच्छति,

स ऊर्जमुपजीवतीति श्लोकाः ।

pMk2

यत्सप्तान्नानि मेधया तपसाजनयत्पितेति,
मेधया हि तपसाजनयत्पितैकमस्य
साधारणमितीदमेवास्य तत्साधारणमन्नं,
यदिदमद्यते ।
स य एतदुपास्ते,
न स पाप्मनो व्यावर्तते;
मिश्रꣳ ह्य् एतत् ।

pM3/k2

द्वे देवानभाजयदिति,
हुतं च प्रहुतं च;
तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वति ।
अथो आहुः
दर्शपूर्णमासाविति ।
तस्मान्नेष्टियाजुकः स्यात् ।

pM4/k2

पशुभ्य एकं प्रायच्छदिति,
तत्पयः;
पयो ह्य् एवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति ।
तस्मात्कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति,
स्तनं वानुधापयन्ति;

pM5/k2

अथ वत्सं जातमाहुः
अतृणाद इति ।
तस्मिन्त्सर्वं प्रतिष्ठितं,
यच्च प्राणिति यच्च नेति,
पयसि हीद꣡ँ सर्वं प्रतिष्ठितं,
यच्च प्राणिति यच्च न ।

pM6/k2

तद्यदिदमाहुः
संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति,
न तथा विद्याद् ।
यदहरेव जुहोति,
तदहः पुनर्मृत्युमपजयत्य् एवं विद्वान्त्;
सर्व꣡ँ हि देवेभ्योऽन्नाद्यं प्रयच्छति ।
कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति ।

pM7/k2

पुरुषो वा अक्षितिः,
स हीदमन्नं पुनः-पुनर्जनयते ।
यो वै तामक्षितिं वेदेति,
पुरुषो वा अक्षितिः ।
स हीदमन्नं धिया-धिया जनयते कर्मभिः
यद्धैतन्न कुर्यात्
क्षीयेत ह ।
सोऽन्नमत्ति प्रतीकेनेति,
मुखं प्रतीकं,
मुखेनेत्य् एतत् ।

स देवानपिगच्छति,
स ऊर्जमुपजीवतीति प्रश॑सा ।

pM8/k3

त्रीण्य् आत्मनेऽकुरुतेतिः
मनो वाचं प्राणं;
तान्य् आत्मनेऽकुरुतान्यत्रमना अभूवं,
नादर्शम्;
अन्यत्रमना अभूवं,
नाश्रौषमितिः
मनसा ह्य् एव पश्यति,
मनसा शृणोति ।

pM9/k3

कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा
धृतिरधृतिर्ह्रीर्धीर्भीरित्य् एतत्सर्वं मन एव ।
तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति ।

pM10/k3

यः कश्च शब्दो,
वागेव सैषा ह्यन्तं आयत्तैषा हि न ।
प्राणोऽपानो व्यान उदानः समानोऽन
इत्य् एतत्सर्वं प्राण एवैतन्मयो वा अयमात्माः
वाङ्मयो,
मनोमयः,
प्राणमयः ।

pM11/k4

त्रयो लोका एत एवः
वागेवायं लोको,
मनोऽन्तरिक्षलोकः,
प्राणोऽसौ लोकः ।

pM12/k5

त्रयो वेदा एत एवः
वागेवर्ग्वेदो,
मनो यजुर्वेदः,
प्राणः सामवेदः ।

pM13/k6

pMk1

देवा पितरो मनुष्या एत एवः वागेव
देवा, मनः पितरः, प्राणो मानुष्याः ।

pM14/k7

पिता माता प्रजैत एवः
मन एव पिता,
वाङ् माता,
प्राणः प्रजा ।

pM15/k8

विज्ञातं विजिज्ञास्यमविज्ञातमेत एवः
यत्किञ्च विज्ञातं वाचस् तद्रूपम्
वाग्घि विज्ञाता,
वागेनं तद्भूत्वावति ।

pM16/k9

यत्किञ्च विजिज्ञास्यं मनसस् तद्रूपम्
मनो हि विजिज्ञास्यं,
मन एनं तद्भूत्वावति ।

pM17/k10

यत्किञ्चाविज्ञातं प्राणस्य तद्रूपम्
प्राणो ह्यविज्ञातः,
प्राण एनं तद्भूत्वावति ।

pM18/k11

तस्यै वाचः पृथिवी शरीरं,
ज्योती रूपमयमग्निः ।
तद्यावत्य् एव वाक्
तावती पृथिवी,
तावानयमग्निः ।

pM19/k12

अथैतस्य मनसो द्यौः शरीरं,
ज्योती रूपमसावादित्यः ।
तद्यावदेव मनस् तावती द्यौः
तावानसावादित्यः ।
तौ मिथुनꣳ समैताम् ।
ततः प्राणोऽजायत ।
स इन्द्रः,
स एषोऽसपत्नो ।
द्वितीयो वै सपत्नो ।
नास्य सपत्नो भवति,
य एवं वेद ।

pM20/k13

अथैतस्य प्राणस्यापः शरीरं,
ज्योती रूपमसौ चन्द्रः ।
तद्यावानेव प्राणः
तावत्य आपः
तावानसौ चन्द्रः ।

pM21/k13

त एते सर्व एव समाः,
सर्वेऽनन्ताः ।
स यो हैतानन्तवत उपास्ते,
अन्तवन्तꣳ स लोकं जयति
अथ यो हैताननन्तानुपास्ते,
अनन्तꣳ स लोकं जयति ।

pM22/k14

स एष संवत्सरः प्रजापतिष् षोडशकलः ।
तस्य रात्रय एव पञ्चदश कला;
ध्रुवैवास्य षोडशी कला ।
स रात्रिभिरेवा च पूर्यते,
अप च क्षीयते ।
सोऽमावास्याꣳ रात्रिमेतया षोडश्या
कलया सर्वमिदं प्राणभृदनुप्रविश्य,
ततः प्रातर्जायते ।
तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न
विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ।

pM23/k15

यो वै स संवत्सरः प्रजापतिष् षोडशकालो,
अयमेव स योऽयमेवंवित्पुरुषः ।
तस्य वित्तमेव पञ्चदश कलाः
आत्मैवास्य षोडशी कला ।
स वित्तेनैवा च पूर्यते,
अप च क्षीयते ।
तदेतन्नभ्यं यदयमात्मा,
प्रधिर्वित्तम् ।
तस्माद्यदि अपि सर्वज्यानिं जीयत,
आत्मना चेज् जीवति,
प्रधिनागादित्य् आहुः ।

pM24/k16

अथ त्रयो वाव लोकाः
मनुष्यलोकः,
पितृलोको,

देवलोक इति ।
सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो,
नान्येन कर्मणा;
कर्मणा पितृलोको;
विद्यया देवलोको ।
देवलोको वै लोकानाꣳ श्रेष्ठस्;
तस्माद्विद्यां प्रशꣳसन्ति ।

pM25/k17

अथातः सम्प्रत्तिः ।
यदा प्रैष्यन्मन्यते,
अथ पुत्रमाहः
त्वं ब्रह्म,
त्वं यज्ञः
त्वं लोक इति ।
स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञो,
अहम्लोक इति ।

pM26/k17

यद्वै किञ्चानूक्तं,
तस्य सर्वस्य ब्रह्मेत्य् एकता ।
ये वै केच यज्ञाः
तेषाꣳ सर्वेषां यज्ञ इत्य् एकता ।
ये वै केच लोकाः
तेषाꣳ सर्वेषां लोक इत्य् एकतैतावद्वा इदꣳ सर्वम्
एतन्मा सर्वꣳ सन्नयमितो भुनजदिति ।
तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः
तस्मादेनमनुशासति ।

स यदैवंविदस्माल्लोकात्प्रैति
अथैभिरेव प्राणैः सह पुत्रमाविशति ।
स यद्यनेन किञ्चिदक्ष्णया कृतं भवति,
तस्मादेनꣳ सर्वस्मात्पुत्रो मुञ्चति ।
तस्मात्पुत्रो नाम ।
स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठति
अथैनमेते देवाः प्राणा अमृता आविशन्ति ।

pM27/k18

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति ।
सा वै दैवी वाग्यया,
यद्-यदेव वदति,
तत्-तद्भवति ।

pM28/k19

दिवश्चैनमादित्याच्च दैवं मन आविशति ।
तद्वै दैवं मनो येनानन्द्य् एव भवति
अथो न शोचति ।

pM29/k20

अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति ।
स वै दैवः प्राणो यः
सञ्चरꣳश्चासञ्चरꣳश्च न व्यथते,
अथो न रिष्यति ।
स एष एवंवित्सर्वेषां भूतानामात्मा भवति ।
यथैषा देवतैवꣳ स ।
यथैतां देवताꣳ सर्वाणि भूतान्यवन्ति

एवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति ।
यदु किञ्चेमाः प्रजाः शोचन्ति
अमैवासां तद्भवति,
पुण्यमेवामुं गच्छति,
न ह वै देवान्पापं गच्छति ।

pM30/k21

अथातो व्रतमीमाꣳसा ।
प्रजापतिर्ह कर्माणि ससृजे ।
तानि सृष्टान्यन्योऽन्येनास्पर्धन्तः
वदिष्याम्य् एवाहमिति वाग्दध्रे;
द्रक्ष्याम्यहमिति चक्षुः;
श्रोष्याम्यहमिति श्रोत्रम्;
एवमन्यानि कर्माणि यथाकर्मम् ।

pM31/k21

तानि मृत्युः श्रमो भूत्वोपयेमे,
तान्य् आप्नोत्;
तान्य् आप्त्वा मृत्युरवारुन्द्ध ।
तस्माच्छ्राम्यत्य् एव वाक्
श्राम्यति चक्षुः,
श्राम्यति श्रोत्रम् ।
अथेममेव नाप्नोद्
योऽयं मध्यमः प्राणः ।

pM32/k21

तानि ज्ञातुं दध्रिरे
अयं वै नः श्रेष्ठो यः सञ्चरंश्चासञ्चरंश्च न
व्यथते,
अथो न रिष्यति ।
हन्तास्यैव सर्वे रूपं भवामेति ।
त एतस्यैव सर्वे रूपमभवन् ।
तस्मादेत एतेनाख्यायन्ते प्राणा इति ।
तेन ह वाव तत्कुलमाचक्षते,
यस्मिन्कुले भवति य एवं वेद ।
य उ हैवंविदा स्पर्धते

K add..anushuShyati
अनुशुष्य हैवान्ततो म्रियत ।
इत्यध्यात्मम् ।

pM33/k22

अथाधिदेवतम्
ज्वलिष्याम्य् एवाहमित्यग्निर्दध्रे;
तप्स्याम्यहमित्य् आदित्यो;
भास्याम्यहमिति चन्द्रमा;
एवमन्या देवता यथादेवतꣳ ।
स यथैषां प्राणानां मध्यमः प्राण,
एवमेतासां देवतानां वायुः ।
म्लोचन्ति ह्यन्या देवता,
न वायुः ।
सैषानस्तमिता देवता यद्वायुः ।

pM34/k23

अथैष श्लोको भवतिः
यतश्चोदेति सूर्यो,
अस्तं यत्र च गच्छतीति
प्राणाद्वा एष उदेति,
प्राणेऽस्तमेति
तं देवाश्चक्रिरे धर्मꣳ,
स एवाद्य,
स उ श्व इति ।
यद्वा एतेऽमुर्ह्यध्रियन्त,
तदेवाप्यद्य कुर्वन्ति ।
तस्मादेकमेव व्रतं चरेत् ।
प्राण्याच्चैवापान्याच्चः
नेन्मा पाप्मा मृत्युराप्नवदिति ।
यद्य् उ चरेत्
समापिपयिषेत् ।
तेनो एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति,
य एवं वेद ।

ch6 = hbM 14.4.4.1-4= hbk16.3.6.1-3

pMk1

त्रयं वा इदं,
नाम रूपं कर्म ।
तेषां नाम्नां वागित्य् एतदेषामुक्थम्
अतो हि सर्वाणि नामान्य् उत्तिष्ठन्ति ।
एतदेषाꣳ सामैतद्धि सर्वैर्नामभिः समम् ।
एतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ।

pMk2

अथ रूपाणां चक्षुरित्य् एतदेषामुक्थम्
अतो हि सर्वाणि रूपाण्य् उत्तिष्ठन्ति ।
एतदेषाꣳ सामैतद्धि सर्वै रूपैः समम् ।
एतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ।

pMk3

अथ कर्मणामात्मेत्य् एतदेषामुक्थम्
अतो हि सर्वाणि कर्माण्य् उत्तिष्ठन्ति ।
एतदेषाꣳ सामैतद्धि सर्वैः कर्मभिः समम् ।
एतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति ।
तदेतत्त्रयꣳ सदेकमयमात्मात्मो
एकः सन्नेतत्त्रयम्
।
तदेतदमृतꣳ सत्येन छन्नम् ।
प्राणो वा अमृतं,
नामरूपे सत्यं;
ताभ्यामयं प्राणश्छन्नः ।

ch2 = hbM 14.5.1-9= hbk16.4.1-9

ch1

pMk1

दृप्तबालाकिर्हानूचानो गार्ग्य आस ।
स होवाचाजातशत्रुं काश्यम्
ब्रह्म ते ब्रवाणीति ।
स होवाचाजातशत्रुः
सहस्रमेतस्यां वाचि दद्मोः
जनको,
जनक इति वै जना धावन्तीति ।

pMk2

स होवाच गार्ग्योः
य एवासावादित्ये पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा
अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
अतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ।

pMk3

स होवाच गार्ग्योः
य एवासौ चन्द्रे पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
बृहन्पाण्दरवासाः सोमो राजेति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
अहर्-अहर्ह सुतः प्रसुतो भवति,

नास्यान्नं क्षीयते ।

pMk4

स होवाच गार्ग्यो
य एवायं विद्युति पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठाः ।
तेजस्वीति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
तेजस्वी ह भवति,
तेजस्विनी हास्य प्रजा भवति ।

pMk5

स होवाच गार्ग्यो
य एवायमाकाशे पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठाः ।
पूर्णमप्रवर्तीति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
पूर्यते प्रजया पशुभिः
नास्यास्माल् लोकात्प्रजोद्वर्तते ।

pMk6

स होवाच गार्ग्यो
य एवायं वायौ पुरुष,

एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ।

pMk7

स होवाच गार्ग्यः
य एवायमग्नौ पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
विषासहिरिति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
विषासहिर्ह भवति,
विषासहिर्हास्य प्रजा भवति ।

pMk8

स होवाच गार्ग्यः
य एवायमप्सु पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठाः ।
प्रतिरूप इति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
प्रतिरूपꣳ हैवैनमुपगच्छति,
नाप्रतिरूपम्

अथो प्रतिरुपोऽस्माज् जायते ।

pMk9

स होवाच गार्ग्यः
य एवायमादर्शे पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
रोचिष्णुरिति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
रोचिष्णुर्ह भवति,
रोचिष्णुर्हास्य प्रजा भवति
अथो यैः सन्निगच्छति,
सर्वाꣳस् तानतिरोचते ।

pM10/k11

स होवाच गार्ग्यः
य एवायं दिक्षु पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
द्वितीयोऽनपग इति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
द्वितीयवान्ह भवति,
नास्माद्गणश्छिद्यते ।

pM11/k10

स होवाच गार्ग्यः
य एवायं यन्तं पश्चाच्छब्दोऽनूदेति
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
असुरिति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
सर्वꣳ हैवास्मिꣳल्लोक आयुरेति,
नैनं पुरा कालात्प्राणो जहाति ।

pMk12

स होवाच गार्ग्यः
य एवायं छायामयः पुरुष,
एतमेवाहं ब्रह्मोपास इति ।
स होवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
मृत्युरिति वा अहमेतमुपास इति ।
स य एतमेवमुपास्ते,
सर्वꣳ हैवास्मिꣳल्लोक आयुरेति,
नैनं पुरा कालान्मृत्युरागच्छति ।

pMk13

स होवाच गार्ग्यः
य एवायमात्मनि पुरुषो,
एतमेवाहं ब्रह्मोपास इति ।
स ह उवाचाजातशत्रुः
मा मैतस्मिन्त्संवदिष्ठा ।
अत्मन्वीति वा अहमेतमुपास इति ।

स य एतमेवमुपास्त,
आत्मन्वी ह भवति
आत्मन्विनी हास्य प्रजा भवति ।
स ह तूष्णीमास गार्ग्यः ।

## pMk14

स ! होवाचाजातशत्रुः
एतावन्न्व्३ इति ।
एतावद्धीति ।
नैतावता विदितं भवतीति ।
स होवाच गार्ग्यः
उप त्वायानीति ।

## pMk15

स होवाचाजातशत्रुः
प्रतिलोमं वै तद्यद्ब्राह्मणः क्षत्रियमुपेयाद्
ब्रह्म मे वक्ष्यतीति ।
व्य् एव त्वा ज्ञपयिष्यामीति ।
तं पाणावादायोत्तस्थौ ।
तौ ह पुरुषꣳ सुप्तमाजग्मतुः ।
तमेतैर्नामभिरामन्त्रयां चक्रेः
बृहन्पाण्दरवासः,
सोम राजन्निति ।
स नोत्तस्थौ ।
तं पाणिनापेषं बोधयां चकार ।
स होत्तस्थौ ।

## pMk16

स होवाचाजातशत्रुः
यत्रैष एतत्सुप्तोऽभूद्
य एष विज्ञानमयः पुरुषः,
क्वैष तदाभूत्
कुत एतदागादिति ।
तदु ह न मेने गार्ग्यः ।

pMk17

स होवाचाजातशत्रुः
यत्रैष एतत्सुप्तोऽभूद्
य एष विज्ञानमयः पुरुषः
तदेषां प्राणानां विज्ञानेन विज्ञानमादाय,
य एषोऽन्तर्हृदय आकाशः
तस्मिञ्छेते ।

pM18/k17

तानि यदा गृह्णाति
अथ हैतत्पुरुषः स्वपिति नाम ।
तद्गृहीत एव प्राणो भवति,
गृहीता वाग्
गृहीतं चक्षुः
गृहीतꣳ श्रोत्रं,
गृहीतं मनः ।

pM19/k18

स यत्रैतत्स्वप्न्यया चरति,
ते हास्य लोकाः ।

तदुतेव महाराजो भवति
उतेव महाब्राह्मण,
उतेवोच्चावचं निगच्छति ।

pM20/k18

स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे
यथाकामं परिवर्ततैवमेवैष एतत्प्राणान्गृहीत्वा
स्वे शरीरे यथाकामं परिवर्तते ।

pM21/k19

अथ यदा सुषुप्तो भवति,
यदा न कस्य चन वेद,
हिता नाम नाड्यो द्वासप्ततिः सहस्राणि
हृदयात्पुरीततमभिप्रतिष्ठन्ते ! ।
ताभिः प्रत्यवसृप्य पुरीतति शेते ।

pM22/k19

स

K om.

यथा कुमारो

kadd. vA mahArAjo

वा महाब्राह्मणो वातिघ्नीमानन्दस्य गत्वा
शयीतैवमेवैष एतच्छेते ।

pM23/k20

स यथोर्णवाभिस् तन्तुनोच्चरेद्
यथा अग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्ति
एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे
लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो

K om. sarva ...
व्युच्चरन्ति ।
तस्योपनिषत्सत्यस्य सत्यमितिः
प्राणा वै सत्यं,
तेषामेष सत्यम् ।

ch2

pMk1

यो ह वै शिशुꣳ
साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद,
सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि ।

pM2/k1

अयं वाव शिशुर्योऽयं मध्यमः प्राणस्;
तस्येदमेवाधानम्
इदं प्रत्याधानं,
प्राणः स्थूणान्नं दाम ।

pM2/k2

तमेताः सप्ताक्षितय उपतिष्ठन्ते॑

## pM3/k2

तद्या इमा अक्षꣳल्लोहिन्यो राजयः
ताभिरेनꣳ रुद्रोऽन्वायत्तो;
अथ या अक्षन्नापः
ताभिः पर्जन्यो;
या कनीनका,
तयादित्यो;
यच्छुक्लं

K kRiShNaM
तेनाग्निः
यच्कृष्णं

K shuklaM
तेनेन्द्रो ।
अधरयैनं वर्तन्या पृथिव्यन्वायत्ता,
द्यौरुत्तरया ।
नास्यान्नं क्षीयते,
य एवं वेद ।

## pM4/k3

तदेष श्लोको भवति
अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्;
तस्मिन्यशो निहितं विश्वरूपम् ।
तस्यासत ऋषयः सप्त तीरे;
वागष्टमी ब्रह्मणा संविदानेति ।

pM5/k3

अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिरः,
एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः ।
तस्मिन्यशो निहितं विश्वरूपमिति,
प्राणा वै यशो निहितं विश्वरूपं,
प्राणानेतदाह ।
तस्यासत ऋषयः सप्त तीर इति,
प्राणा वा ऋषयः,
प्राणाणेतदाह ।
वागष्टमी ब्रह्मणा संविदानेति,
वाग्घ्यष्टमी ब्रह्मणा संवित्ते ।

pM6/k4

इमावेव गोतमभरद्वाजाउ
अयमेव गोतमो,
अयं भरद्वाज ।
इमावेव विश्वामित्रजमदग्नीः
अयमेव विश्वामित्रो,
अयं जमदग्निः ।
इमावेव वसिष्ठकश्यपाउ
अयमेव वसिष्ठो,
अयं कश्यपो ।
वागेवात्रिः
वाचा ह्यन्नमद्यते,
अत्तिर्ह वै नामैतद्यदत्रिरिति ।
सर्वस्यात्ता भवति,
सर्वमस्यान्नं भवति,
य एवं वेद ।

## ch3

### pMk1

द्वे वाव ब्रह्मणो रूपे॒
मूर्तं चैवामूर्तं च,
मर्त्यं चामृतं च,
स्थितं च यच्च,
सच्च त्यं च ।

### pMk2

तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यम्
एतत्स्थितम्
एतत्सत् ।

### pM3/k2

तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य
सत एष रसो य एष तपति;
सतो ह्य् एष रसः ।

### pM4/k3

अथामूर्तं वायुश्चान्तरिक्षश्चैतदमृतम्
एतद्यद्
एतत्त्यम् ।

pM5/k3

तस्यैतस्यामूर्तस्य,
तस्यामृतस्यैतस्य यत,
एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्;
त्यस्य ह्य् एष रस ।
इत्यधिदेवतम् ।

pM6/k4

अथाध्यात्मम् ।
इदमेव मूर्तं यदन्यत्प्राणाच्च
यश्चायमन्तरात्मन्नाकाशः
एतन्मर्त्यम्
एतत्स्थितम्
एतत्सत् ।

pM7/k4

तस्यैतस्य मूर्तस्य,
एतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत
एष रसो यच्चक्षुः;
सत ह्य् एष रसः ।

pM8/k5

अथामूर्तम्
प्राणश्च यश्चायमन्तरात्मन्नाकाश,
एतदमृतम्
एतद्यद्

एतत्त्यम् ।

pM9/k5

तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत,
एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषस्;
त्यस्य ह्य् एष रसः ।

pM10/k6

तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासो,
यथा पाण्ड्वाविकं,
यथेन्द्रगोपो,
यथाग्न्यर्चिः
यथा पुण्डरीकं,
यथा सकृद्विद्युत्तꣳ ।
सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति,
य एवं वेद ।

pM11/k6

अथात आदेशः
नेति नेति,
न ह्य् एतस्मादिति नेत्यन्यत्परमस्ति ।
अथ नामधेयꣳ सत्यस्य सत्यमितिः
प्राणा वै सत्यं,
तेषामेष सत्यम् ।

ch4

pMk1

मैत्रेयीति होवाच याज्ञवल्क्य,
उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि ।
हन्त तेऽनया कात्यायन्यान्तं करवाणीति ।

pMk2

सा होवाच मैत्रेयीः
यन्म इयं,
भगोः,
सर्वा पृथिवी वित्तेन पूर्णा स्यात्
कथं तेनामृता स्यामिति ।
नेति होवाच याज्ञवल्क्यो;
यथैवोपकरणवतां जीवितं,
तथैव ते जीवितꣳ स्याद्;
अमृतत्वस्य तु नाशास्ति वित्तेनेति ।

pMk3

सा होवाच मैत्रेयीः
येनाहं नामृता स्यां,
किमहं तेन कुर्याम् ।
यदेव भगवान्वेद,
तदेव मे ब्रूहीति ।

pMk4

स होवाच याज्ञवल्क्यः
प्रिया वतारे

K batAre
नः सती प्रियं भाषस ।
एहि
आस्व

K Assva
व्याख्यास्यामि ते ।
व्याचक्षाणस्य तु मे निदिध्यासस्वेति ।
ब्रवितु भगवानिति

K om. bravitu ...

pMk5

स होवाच याज्ञवल्क्यो

K om.
न वा अरे पत्युः कामाय पतिः प्रियो भवति
आत्मनस् तु कामाय पतिः प्रियो भवति ।
न वा अरे जायायै कामाय जाया प्रिया भवति
आत्मनस् तु कामाय जाया प्रिया भवति ।
न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति
आत्मनस् तु कामाय पुत्राः प्रिया भवन्ति ।
न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति
आत्मनस् तु कामाय वित्तं प्रियं भवति ।
न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति
आत्मनस् तु कामाय ब्रह्म प्रियं भवति ।
न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति
आत्मनस् तु कामाय क्षत्रं प्रियं भवति ।
न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति

आत्मनस् तु कामाय लोकाः प्रिया भवन्ति ।
न वा अरे देवानां कामाय देवाः प्रिया भवन्ति
आत्मनस् तु कामाय देवाः प्रिया भवन्ति ।
न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति
आत्मनस् तु कामाय भूतानि प्रियाणि भवन्ति ।
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति
आत्मनस् तु कामाय सर्वं प्रियं भवति ।
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो ।
मैत्रेयि
आत्मनो वा अरे दर्शनेन
श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम् ।

pMk6

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद;
क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद;
लोकास् तं परादुर्योऽन्यत्रात्मनो लोकान्वेद;
देवास् तं परादुर्योऽन्यत्रात्मनो देवान्वेद;
भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद;
सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं
वेदेदं ब्रह्मेदं क्षत्रम्
इमे लोका,
इमे देवा,
इमानि भूतानीदꣳ सर्वं,
यदयमात्मा ।

pMk7

स यथा दुन्दुभेर्हन्यमानस्य न
बाह्याङ्छब्दाङ्छक्नुयाद्ग्रहणाय,

दुन्दुभेस् तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः;

pM8/k9

स यथा वीणायै वाद्यमानायै
न बाह्याङ्छब्दाङ्छक्नुयाद्ग्रहणाय,
वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो ग्हीतः;

pM9/k8

स यथा शङ्खस्य ध्मायमानस्य
न बाह्याङ्छब्दाङ्छक्नुयाद्ग्रहणाय,
शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः;

pMk10

स यथार्द्रैधाग्नेरभ्याहितस्य

K abhyAhitAt

पृथग्धूमा विनिश्चरन्ति
एव वा अरेऽस्य महतो भूतस्य निश्वसितम्

K niHshvasitam

एतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस
इतिहासः पुराणं विद्या उपनिषदः श्लोकाः
सूत्राण्यनुव्याख्यानानि व्याख्यानानि
अस्यैवैतानि सर्वाणि निश्वसितानि

kniHshvasitAni

pMk11

स यथा सर्वासामपाꣳ समुद्र एकायनम्
एवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनम्
एवꣳ सर्वेषां गन्धानां नासिके एकायनम्
एवꣳ सर्वेषाꣳ रसानां जिह्वैकायनम्
एवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनम्
एवꣳ सर्वेषꣳ शब्दानाꣳ श्रोत्रमेकायनम्
एवꣳ सर्वेषाꣳ सङ्कल्पानां मन एकायनम्

K variato ordineH
एवꣳ सर्वेषां वेदानां वागेकायनम्
एवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनम्
एवꣳ सर्वेषामध्वनां पादावेकायनम्
एवꣳ सर्वेषामानन्दानामुपस्थ एकायनम्
एवꣳ सर्वेषां विसर्गाणां पायुरेकायनम्
एवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनम्

pMk12

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत,
नाहास्योद्ग्रहणायैव

K na hAsyodgrahaNAyaiva
स्याद्
यतो-यतस् त्वाददीत लवणमेवैवं वा
अर इदं महद्भूतमनन्तमपारं विज्ञानघन
एवैतेभ्यो भूतेभ्यः समुत्थाय,
तान्य् एवानुविनश्यति;
न प्रेत्य सञ्ज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ।

pMk13

सा होवाच मैत्रेयि
अत्रैव मा भगवानमूमुहद्
न प्रेत्य सञ्ज्ञास्तीति ।

pM14/k13

स होवाच याज्ञवल्क्यो

K om.
न वा अरेऽहं मोहं ब्रवीमि
अलं वा अर इदं विज्ञानाय ।

pM15/k14

यत्र हि द्वैतमिव भवति,

K variato ordineH
तदितर इतरं जिघ्रति,
तदितर इतरं पश्यति
तदितर इतरँ शृणोति,
तदितर इतरमभिवदति,
तदितर इतरं मनुते,
तदितर इतरं विजानाति ।

pM16/k14

यत्र त्वस्य सर्वमात्मैवाभूत्

kvariato ordineH
तत्केन कं पश्येत्
तत्केन कं जिघ्रेत्
तत्केन कँ शृणुयात्

तत्केन कमभिवदेत्
तत्केन कं मन्वीत,
तत्केन कं विजानीयाद् ।
येनेदꣳ सर्वं विजानाति,
तं केन विजानीयाद्
विज्ञातारमरे केन विजानीयादिति ।

ch5

pMk1

इयं पृथिवी सर्वेषां भूतानां मधु
अस्यै पृथिव्यै सर्वाणि भूतानि मधु;
यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो,
यस् चायमध्यात्मꣳ शारीरस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्म,
इदꣳ सर्वम् ।

pMk2

इमा आपः सर्वेषां भूतानां मधु
आसामपाꣳ सर्वाणि भूतानि मधु;
यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मꣳ रैतसस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्म,
इदꣳ सर्वम् ।

## pMk3

अयमग्निः सर्वेषां भूतानां मधु
अस्याग्नेः सर्वाणि भूतानि मधु;
यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मं वाङ्मयस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्म,
इदꣳ सर्वम् ।

## pM4/k10

अयमाकाशः सर्वेषां भूतानां मधु
अस्याकाशस्य सर्वाणि भूतानि मधु;
यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मꣳ हृद्य् आकाशस् तेजोमयोऽमृतमयः
पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

## pM5/k4

अयं वायुः सर्वेषां भूतानां मधु
अस्य वायोः सर्वाणि भूतानि मधु;
यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मं प्राणस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदं अमृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

## pM6/k5

अयमादित्यः सर्वेषां भूतानां मधु
अस्यादित्यस्य सर्वाणि भूतानि मधु;
यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मं चाक्षुषस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pMk7

अयं चन्द्रः सर्वेषां भूतानां मधु
अस्य चन्द्रस्य सर्वाणि भूतानि मधु;
यश्चायमस्मिꣳश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मं मानसस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pM8/k6

इमा दिशः सर्वेषां भूतानां मधु
आसां दिशाꣳ सर्वाणि भूतानि मधु;
यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्
तेजोमयोऽमृतमयः
पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pM9/k8

इयं विद्युत्सर्वेषां भूतानं मधु
अस्यै विद्युतः सर्वाणि भूतानि मधु;
यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मं तैजसस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pM10/k9

अयꣳ स्तनयित्नुः सर्वेषां भुतानां मधु
अस्य स्तनयित्नोः सर्वाणि भूतानि मधु;
यश्चायमस्मिन्त्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मꣳ शाब्दः सौवरस् तेजोमयोऽमृतमयः
पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pMk11

अयं धर्मः सर्वेषां भूतानां मधु
अस्य धर्मस्य सर्वाणि भूतानि मधु;
यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मं धार्मस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pMk12

इदꣳ सत्यꣳ सर्वेषां भूतानां मधु
अस्य सत्यस्य सर्वाणि भूतानि मधु;

यश्चायमस्मिन्त्सत्ये तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मꣳ सात्यस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pMk13

इदं मानुषꣳ सर्वेषां भूतानां मधु
अस्य मानुषस्य सर्वाणि भूतानि मधु;
यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो,
यश्चायमध्यात्मं मानुषस् तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pMk14

अयमात्मा सर्वेषां भूतानां मधु
अस्यात्मनः सर्वाणि भूतानि मधु;
यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो,
यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषो,
अयमेव स योऽयमात्मेदममृतम्
इदं ब्रह्मेदꣳ सर्वम् ।

pMk15

स वा अयमात्मा सर्वेषां अधिपतिः,
सर्वेषां भूतानाꣳ राजा ।
तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता,
एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे
देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ।

pMk16

इदं वै तन्मधु डध्यङ्ङ् अथर्वणोऽश्विभ्यामुवाच ।
तदेतदृषिः पश्यन्नवोचत्

lv 1.116.12:
तद्वां,
नरा,
सनये दꣳस उग्रम्
आविष् कृणोमि,
तन्यतुर्न वृष्टिं,
डध्यङ् ह यन्मध्व् अथर्वणो वाम्
अश्वस्य शीर्ष्णा प्र यदीमुवाचेति ।

pMk17

इदं वै तन्मधु डध्यङ्ङ् अथर्वणोऽश्विभ्यामुवाच ।
तदेतदृषिः पश्यन्नवोचत्

lv 1.117.22:
अथर्वणायाश्विना डधीचेऽश्व्यꣳ शिरः प्रत्यैरयतं;
स वां मधु प्र वोचदृतायन्
त्वाष्ट्रं यद्
दस्राउ
अपिकक्ष्यं वामिति ।

pMk18

इदं वै तन्मधु डध्यङ्ङ् अथर्वणोऽश्विभ्यामुवाच ।
तदेतदृषिः पश्यन्नवोचत्
पुरश्चक्रे द्विपदः,

पुरश्चक्रे चतुष्पदः;
पुरः स,
पक्षी भुत्वा,
पुरः पुरुष आविशदिति ।
स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो;
नैनेन किं चनानावृतं,
नैनेन किं चनासंवृतम् ।

pMk19

इदं वै तन्मधु डध्यङ्ङ् अथर्वणोऽश्विभ्यामुवाच ।
तदेतदृषिः पश्यन्नवोचत्

lv 6.47.18:
रूपꣳ-रूपं प्रतिरूपो बभूव,
तदस्य रूपं प्रतिचक्षणाये-
-न्द्रो मायाभिः पुरुरूप ईयते,
युक्ता ह्यस्य हरयः शता दशेति ।
अयं वै हरयो,
अयं वै दश च सहस्राणि बहूनि चानन्तानि च ।
तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्
अयमात्मा ब्रह्म सर्वानुभूः ।
इत्यनुशासनम् ।
[पनुस्तुब्]

pM20

pro m5,20-22 schribitkrishna 6; vide infra
अथ वꣳशः ।
तदिदं वयꣳ
हौर्पणाय्याच्,

छौर्पणय्यो गौतमाद्
गौतमो वत्स्याद्
वत्स्यो वात्स्याच्च पाराशर्याच्च,
पाराशर्यः षाङ्ख्याच्च भारद्वाजाच्च,
भारद्वाज औदावहेश्च हाण्डिल्याच्च,
हाण्डिल्यो वैजवापाच्च गौतमाच्च,
गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च,
वैष्टपुरेयः हाण्डिल्याच्च ऱौहिणायनाच्च,
ऱौहिणायनः हौनकाच्चात्रेयाच्च ऱैभ्याच्च,
ऱैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च,
कौण्डिन्यायनः कौण्डिन्यात्
कौण्डिन्यः कौण्डिन्यात्
कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च,

pM21

pro m5,20-22 schribitkrishna 6; vide infra
अग्निवेश्यः षौतवात्
षौतवः पाराशर्यात्
पाराशर्यः जातुकर्ण्यात्
जातुकर्ण्यो भारद्वाजाद्
भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च,
गौतमो भारद्वाजाद्
भारद्वाजो वैजवापायनाच्,
वैजवापायनः कशिकायनेः,
कशिकायनिर्घृतकौशिकाद्
घृतकौशिकः पाराशर्यात्
पाराशर्यः पाराशर्यात्
पाराशर्यः जातुकर्ण्यात्
जातुकर्ण्यो भारद्वाजाद्

भारद्वाजो भारद्वाजाच्चासुरायणाच्चयस्काच्च,
असुरायणस् ट्रैवणेः
ट्रैवणिराउपजन्धनेः
आउपजन्धनिःअसुरेः
असुरिर्भारद्वाजाद्
भारद्वाजो अत्रेयात्

pM22

pro m5,20-22 schribitkrishna 6; vide infra
अत्रेयो माण्टेः,
माण्टिर्गौतमाद्
गौतमो गौतमाद्
गौतमो वात्स्याद्
वात्स्यः हाण्डिल्याच्,
छाण्डिल्यः कैशोर्यात्काप्यात्
कैशोर्यः काप्यः कुमारहरितात्
कुमारहरितो गालवाद्
गालवो विदर्भीकौण्डिन्याद्
विदर्भीकौण्डिन्यो बाभवाद्वत्सनपाद्
बाभवः पथः षौभरात्
पन्थाः षौभरोऽयास्यादङ्गिरसाद्
आयास्यो अङ्गिरसऽभुतेस् द्वाष्ट्राद्
अभुतिः द्वाष्ट्रो विश्वरूपाद्वाष्ट्राद्
विश्वरूपस् द्वाष्ट्रोऽश्विभ्याम्
आश्विनौ डधिच अथर्वनाद्
डध्यङ्ङ् अथर्वनोऽथर्वनो डैवाद्
अथर्वा डैव मृत्योः प्राद्धꣳसनान्
मृत्युः प्राद्धꣳसनः षनगात्
षनगः परेष्टिणः

परेष्ठी ब्रह्मनो
ब्रह्म स्वयम्भु,
ब्रह्मणे नमः ।

## chk6

schribitkrishna pro m5,20-22; vide supra

## pk1

अथ वꣳशः
पशुतिमाष्यो गौपवनाद्
गौपवनः पशुतिमाष्यात्
पशुतिमाष्यो गौपवनाद्
गौपवनः कौशिकात्
कौशिकः कौण्डिन्यात्
कौण्डिन्यः हाण्डिल्यात्
हाण्डिल्यः कौशिकाच्च गौतमाच्च,
गौतमो

## pk2

अग्निवेश्याद्
अग्निवेश्यः हाण्डिल्याच्चानभिम्लाताच्च,
अनभिम्लात अनभिम्लाताद्
अनभिम्लात अनभिम्लाताद्
अनभिम्लातो गौतमाद्
गौतमः सैतवप्राचीनयोग्याभ्याꣳ,
सैतवप्राचीनयोग्यौ पाराशर्यात्
पाराशर्यो भारद्वाजाद्

भारद्वाजो भारद्वाजाच्च गौतमाच्च,
गौतमो भारद्वाजाद्
भारद्वाजः पाराशर्यात्
पाराशर्यो वैजवापायनाद्
वैजवापायनः कौशिकायनेः,
कौशिकायनिर्

pk3

घृतकौशिकाद्
घृतकौशिकः प्राशर्यायणात्
पारशर्यायणः पाराशर्यात्
पाराशर्यो जातूकर्ण्यात्
जातूकर्ण्य असुरायणाच्च यास्काच्च,
असुरायणस् ट्रैवणेः,
ट्रैवणिरौपजन्धनेः,
औपजन्धनिरसुरेः,
असुरिर्भारद्वाजाद्
भारद्वाज अत्रेयाद्
अत्रेयो माण्टेः,
माण्टिर्गौतमाद्
गौतमो वात्स्याद्
वात्स्यः हाण्डिल्याच्,
छाण्डिल्यः कैशोर्यात्काप्यात्
कैशोर्यः काप्यः कुमारहारितात्
कुमारहारितो गालवाद्
गालवो विदर्भीकौण्डिन्याद्
विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्
वत्सनपाद्बाभ्रवः पथः षौभरात्
पन्थाः षौभरोऽयास्यादङ्गिरसाद्
आयास्य अङ्गिरस अभूतेस् द्वाष्ट्राद्

अभूतिस् द्वाष्ट्रो विश्वरूपात्द्वाष्ट्राद्
विश्वरूपस् द्वाष्ट्रोऽश्विभ्याम्
आश्विनौ डधीच अथर्वणाद्
डध्यङ्ङ् अथर्वणोऽथर्वणो डैवाद्
आथर्वा डैवो मृत्योः प्राध्वꣳसनान्
मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्
प्रध्वꣳसन एकर्षेः
एकर्षिर्विप्रचित्तेः
विप्रचित्तिर्व्यष्टेः
व्यष्टिः षनारोः,
षनारुः षनातनात्
षनातनः षनगात्
षनगः परमेष्ठिनः,
परमेष्ठी ब्रह्मणो;
ब्रह्म स्वयम्भु,
ब्रह्मणे नमः ।
[प्रोर्मल्]

ch3 = hbM 14.6. = hbk16.6.

ch1

pMk1

जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे ।
तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुः ।
तस्य ह जनकस्य वैदेहस्य विजिज्ञासा

Ai.gH II 2, paH 142a[Tgrx16]AH +vijij nAsA

`बभूवः
कः स्विदेषां ब्राह्मणानामनूचानतम इति ।

pM2/k1

स ह गवाꣳ सहस्रमवरुरोध;
दश-दश पादा एकैकस्याः शृङ्ग्योराबद्धा बभूवुः ।

pM2/k2

तान्होवाचः
ब्राह्मणा भगवन्तो,
यो वो ब्रह्मिष्ठः,
स एता गा उदजतामिति ।
ते ह ब्राह्मणा न दधृषुः ।

pM3/k2

अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः,
सौम्योदज,
षामश्रवा३ इति ।
ता होदाचकार ।
ते ह ब्राह्मणाश्चुक्रुधुः
कथं नु नो ब्रह्मिष्ठो ब्रुवीतेति ।

pM4/k2

अथ ह जनकस्य वैदेहस्य होताश्वलो बभूव ।
स हैनं पप्रच्छः
त्वं नु खलु नो,

याज्ञवल्क्य,
ब्रह्मिष्ठोऽसी३ इति ।
स होवाचः
नमो वयं ब्रह्मिष्ठाय कुर्मो;
गोकामा एव वयꣳ स्म इति ।
तꣳ ह तत एव प्रष्टुं दध्रे होताश्वलः

pM5/k3

याज्ञवल्क्येति होवाच,
यदिदꣳ सर्वं मृत्युनाप्तꣳ,
सर्वं मृत्युनाभिपन्नं,
केन यजमानो मृत्योराप्तिमतिमुच्यत इति ।
होत्रर्त्विजाग्निना वाचा;
वाग्वै यज्ञस्य होता ।
तद्येयं वाक्सोऽयमग्निः स होता सा मुक्तिः सातिमुक्तिः ।

pM6/k4

याज्ञवल्क्येति होवाच,
यदिदꣳ सर्वमहोरात्राभ्यामाप्तꣳ,
सर्वमहोरात्राभ्यामभिपन्नं,
केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इति ।
अध्वर्युणर्त्विजा चक्षुषादित्येन;
चक्षुर्वै यज्ञस्याध्वर्युः ।
तद्यदिदं चक्षुः,
सोऽसावादित्यः;
सोऽध्वर्युः सा मुक्तिः सातिमुक्तिः ।

pM7/k5

याज्ञवल्क्येति होवाच,
यदिदꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तꣳ,
सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं,
केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इति ।
ब्रह्मणर्त्विजा मनसा चन्द्रेण;
मनो वै यज्ञस्य ब्रह्मा ।
तद्यदिदं मनः,
सोऽसौ चन्द्रः स ब्रह्मा सा मुक्तिः सातिमुक्तिः ।

## pM8/k6

याज्ञवल्क्येति होवाच,
यदिदमन्तरिक्षमनारम्बणमिव;
केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ।
उद्गात्रर्त्विजा वयुना प्राणेन;
प्राणो वै यज्ञस्योद्गाता ।
तद्योऽयं प्राणः स वायुः
स उद्गाता सा मुक्तिः सातिमुक्तिः ।
इत्यतिमोक्षा,
अथ सम्पदः ।

## pM9/k7

याज्ञवल्क्येति होवाच,
कतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति ।
तिसृभिरिति ।
कतमास् तास् तिस्र इति ।
पुरोनुवाक्या च याज्या च शस्यैव तृतीया ।
किं ताभिर्जयतीति ।
पृथिवीलोकमेव पुरोनुवाक्यया जयति

अन्तरिक्षलोकं याज्यया,
द्यौर्लोकꣳ शस्यया

pM10/k8

याज्ञवल्क्येति होवाच,
कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति ।
तिस्र इति ।
कतमास् तास् तिस्र इति ।
या हुता उज्ज्वलन्ति,
या हुता अतिनेदन्ति,
या हुता अधिशेरते ।
किं ताभिर्जयतीति ।
या हुता उज्ज्वलन्ति,
देवलोकमेव ताभिर्जयतिः
दीप्यत इव हि देवलोको ।
या हुता अतिनेदन्ति,
मनुष्यलोकम्

K pitRilokam
एव ताभिर्जयति
अतीव हि मनुष्यलोको

K pitRiloko
या हुता अधिशेरते,
पितृलोकम्

K manuShyalokam
एव ताभिर्जयति
अध इव हि पितृलोकः

K manuShyalokaH

pM11/k9

याज्ञवल्क्येति होवाच,
कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो
देवताभिर्गोपायिष्यतीत्य्

K gopAyatIty
एकयेति ।
कतमा सैकेति ।
मन एवेति ।
अनन्तं वै मनो,
अनन्ता विश्वे देवा ।
अनन्तमेव स तेन लोकं जयति ।

pM12/k10

याज्ञवल्क्येति होवाच,
कत्ययमद्योद्गातास्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति ।
तिस्र इति ।
कतमास् तास् तिस्र इति ।
पुरोनुवाक्या च याज्या च शस्यैव तृतीयाधिदेवतम्
अथाध्यत्मं

K om. adhidevatam...
कतमास् ता या अध्यात्ममिति ।
प्राण एव पुरोनुवाक्यापानो याज्या,
व्यानः शस्या ।
किं ताभिर्जयतीति ।
यत्किञ्चेदं प्राणभृदिति

kpro yat...

schribitpRithivIlokameva puronuvAkyayA jayati
ततो ह होताश्वल उपरराम ।

## ch2

### pMk1

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ ।
याज्ञवल्क्येति होवाच,
कति ग्रहाः,
कत्यतिग्रहा इति ।
अष्टौ ग्रहा,
अष्टावतिग्रहा इति ।
ये तेऽष्टौ ग्रहा,
अष्टावतिग्रहाः,
कतमे त इति ।

### pMk2

प्राणो वै ग्रहः ।
सोऽपानेनातिग्रहेण

K sa gandhenAtigraheNa

गृहीतो ।
अपानेन

K prANena

हि गन्धाञ्जिघ्रति ।

### pM3/k4

जिह्वा वै ग्रहः ।
स रसेनातिग्रहेण गृहीतो;
जिह्वया हि रसान्विजानाति ।

pM4/k3

वाग्वै ग्रहः ।
स नाम्नातिग्रहेण गृहीतो;
वाचा हि नामान्यभिवदति ।

pMk5

चक्षुर्वै ग्रहः ।
स रूपेणातिग्रहेण गृहीतश्;
चक्षुषा हि रूपाणि पश्यति ।

pMk6

श्रोत्रं वै ग्रहः ।
स शब्देनातिग्रहेण गृहीतः;
श्रोत्रेण हि शब्दाङ्छृणोति ।

pMk7

मनो वै ग्रहः ।
स कामेनातिग्रहेण गृहीतो;
मनसा हि कामान्कामयते ।

pMk8

हस्तौ वै ग्रहः ।
स कर्मणातिग्रहेण गृहीतो;
हस्ताभ्याꣳ हि कर्म करोति ।

pMk9

त्वग्वै ग्रहः ।
स स्पर्शेनातिग्रहेण गृहीतस्;
त्वचा हि स्पर्शान्वेदयत ।
इत्यष्टौ ग्रहा,
अष्टावतिग्रहाः ।

pMk10

याज्ञवल्क्येति होवाच,
यदिदꣳ सर्वं मृत्योरन्नं,
का स्वित्सा देवता,
यस्या मृत्युरन्नमिति ।
अग्निर्वै मृत्युः,
सोऽपामन्नम्
अप पुनर्मृत्युं जयति ।

pM11/k12

याज्ञवल्क्येति होवाच,
यत्रायं पुरुषो म्रियते,
किमेनं न जहातीति ।
नामेति
अनन्तं वै नामानन्ता विश्वे देवा;
अनन्तमेव स तेन लोकं जयति ।

## pM12/k11

याज्ञवल्क्येति होवाच,
यत्रायं पुरुषो म्रियत,
उदस्मात्प्राणाः क्रामन्ति
आहो नेति ।
नेति होवाच याज्ञवल्क्यो,
अत्रैव समवनीयन्ते,
स उच्छ्वयति
आध्मायति
आध्मातो मृतः शेते ।

## pMk13

याज्ञवल्क्येति होवाच,
यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति,
वातं प्राणश्,
चक्षुरादित्यं,
मनश्चन्द्रं,
दिशः श्रोत्रं,
पृथिवीꣳ शरीरम्
आकाशमात्मौषधीर्लोमानि,
वनस्पतीन्केशा,
अप्सु लोहितं च रेतश्च निधीयते,
क्वायं तदा पुरुषो भवतीति ।
आहर,
सौम्य,
हस्तम् ।

pM14/k13

आर्तभागेति होवाचावाम्

K om. iti hovAcha

एवैतद्

kevaitasya

वेदिष्यावो;

न नावेतत्सजन इति ।

तौ होत्क्रम्य मन्त्रयां चक्रतुस्

K chakrAte

तौ ह यदूचतुः,

कर्म हैव तदूचतुः

अथ ह यत्प्रशꣳसतुः,

कर्म हैव तत्प्रशꣳसतुः

पुण्यो वै पुण्येन कर्मणा भवति,

पापः पापेनेति ।

ततो ह जारत्कारव आर्तभाग उपरराम ।

ch3

pMk1

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ ।

याज्ञवल्क्येति होवाच,

मद्रेषु चरकाः पर्यव्रजाम;

ते पतञ्चलस्य काप्यस्य गृहानैम ।

तस्यासीद्दुहिता गन्धर्वगृहीता;

तमपृच्छामः

कोऽसीति ।

सोऽब्रवीत्
षुधन्वाङ्गिरस इति ।
तं यदा लोकानामन्तानपृच्छामाथैतद्

K athainam
अब्रूमः
क्व पारिक्षिता अभवन्निति ।
क्व पारिक्षिता अभवन्निति ।

kabhavant.
तत्

K sa
त्वा पृच्छामि,
याज्ञवल्क्यः
क्व पारिक्षिता अभवन्निति ।

pMk2

स होवाचोवाच वै स तद्
अगच्छन्वै ते तत्र,
यत्राश्वमेधयाजिनो गच्छन्तीति ।
क्व न्वश्वमेधयाजिनो गच्छन्तीति ।
द्वात्रिꣳशत वै देवरथाह्न्यान्ययं लोकस्;
तꣳ समन्तं लोकं द्विस्तावत्पृथिवी

K samantaM pRithivI dvistAvat
पर्येति;
ताꣳ

K tAꣳ samantaM
पृथिवीं द्विस्तावत्समुद्रः पर्येति ।
तद्यावती क्षुरस्य धारा,
यावद्वा मक्षिकायाः पत्रं,

तावानन्तरेणाकाशः ।
तान्९न्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्;
तान्वायुरात्मनि धित्वा तत्रागमयद्यत्र परिक्षिता

K ashvamedhayAjino
अभवन्निति ।
एवमिव वै स वायुमेव प्रशशꣳस;
तस्माद्वायुरेव व्यष्टिः
वायुः समष्टिः ।
अप पुनर्मृत्युं जयति,
सर्वमायुरेति

K om. sarvamAyureti
य एवं वेद ।
ततो ह भुज्युर्लाह्यायनिरुपरराम ।

chM4/k5

pMk1

अथ हैनं कहोडः

K kaholaH
कौषीतकेयः पप्रच्छ
याज्ञवल्क्येति होवाच,
यद्

K add. eva
साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः
तं मे व्याचक्ष्वेति ।
एष त आत्मा सर्वान्तरः ।
कतमो,

याज्ञवल्क्य,
सर्वान्तरो ।
योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति ।
एतं वै तमात्मानं विदित्वा,
ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च
व्युत्थायाथ भिक्षाचर्यं चरन्ति ।
या ह्य् एव पुत्रैषणा सा वित्तैषणा,
या वित्तैषणा सा लोकैषणोभे
ह्य् एते एषणे एव भवतः ।
तस्माद्ब्राह्मणः पाण्डितः

K brAmaNaH
पाण्डित्यं निर्विद्य,
बाल्येन तिष्ठासेद्;
बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः
अमौनं च मौनं च निर्विद्याथ ब्राह्मणः ।
स ब्राह्मणः केन स्याद् ।
येन स्यात्
तेनेदृश एव भवति,
य एवं वेद

K evAto.anyadArtaM
ततो ह कहोडः

K kaholaH
कौषीतकेय उपरराम ।

chM5/k4

pMk1

अथ हैनमूषस्तश्चाक्रायणः पप्रच्छ ।
याज्ञवल्क्येति होवाच,
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः
तं मे व्याचक्ष्वेति ।
एष त आत्मा सर्वान्तरः ।
कतमो,
याज्ञवल्क्य,
सर्वान्तरो ।
यः प्राणेन प्राणिति,
स त आत्मा सर्वान्तरो;
योऽपानेनापानिति,
स त आत्मा सर्वान्तरो;
यो व्यानेन व्यनिति,
स त आत्मा सर्वान्तरो;
य उदानेनोदनिति,
स त आत्मा सर्वान्तरो ।
यः समानेन समनिति,
स त आत्मा सर्वन्तर।

K om. yaH ...
एष त आत्मा सर्वान्तरः ।

pM1/k2

स होवाचोषस्तश्चाक्रायणोः
यथा वै ब्रूयादसौ गौः
असावश्व इति
एवमेवैतद्व्यपदिष्टं भवति ।
यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः
तं मे व्याचक्ष्वेति ।
एष त आत्मा सर्वान्तरः ।

कतमो,
याज्ञवल्क्य,
सर्वान्तरो ।
न दृष्टेर्द्रष्टारं पश्येः
न श्रुतेः श्रोतारꣳ शृणुयाः
न मतेर्मन्तारं मन्वीथा,
न विज्ञातेर्विज्ञातारं विजानीया ।
एष त आत्मा सर्वान्तरो ।
अतोऽन्यदार्तम् ।
ततो होषस्तश्चाक्रायण उपरराम ।

ch6

pMk1

अथ हैनं गार्गी वाचक्नवी पप्रच्छः
याज्ञवल्क्येति होवाच,
यदिदꣳ सर्वमप्स्वोतं च प्रोतं च,
कस्मिन्नु

K nu khalv

आप ओताश्च प्रोताश्चेति ।
वायौ,
गार्गीति ।
कस्मिन्नु

K nu khalu

वायुरोतश्च प्रोतश्चेति ।
आकाश एव

K antarikShalokeShu

गार्गीति ।
कस्मिन्न्वाकाश

K nu khalvantarikShalokA
॒ ओतश्च प्रोतश्चेति ।
अन्तरिक्षलोकेषु

K gandharvalokeShu
गार्गीति ।
कस्मिन्नु खल्वन्तरिक्षलोका

K gandharvalokA
ओताश्च प्रोताश्चेति ।
द्यौर्लोकेषु,
गार्गीति ।
कस्मिन्नु खलु द्यौर्लोका ओताश्च प्रोताश्चेत्य्

K om. dyaurlokeShu ...
अदित्यलोकेषु,
गार्गीति ।
कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति ।
चन्द्रलोकेषु,
गार्गीति ।
कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति ।
नक्षत्रलोकेषु,
गार्गीति ।
कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति ।
देवलोकेषु,
गार्गीति ।
कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेति ।
गन्धर्वलोकेषु

K indralokeShu
गार्गीति ।

कस्मिन्नु खल्व् गन्धर्वलोका

K indralokA

ओताश्च प्रोताश्चेति ।
प्रजापतिलोकेषु,
गार्गीति ।
कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ।
ब्रह्मलोकेषु,
गार्गीति ।
कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति ।
स होवाचः
गार्गि,
मातिप्राक्षीः
मा ते मूर्धा व्यपप्तद्

K vipaptad

अनतिप्रश्न्यां वै देवतामतिपृच्छसि ।
गार्गि,
मातिप्राक्षीरिति ।
ततो ह गार्गी वाचक्नव्य् उपरराम ।

chM7

K ex parte aliteH vide infra

pMk1

अथैनमूद्दालक आरुणिः पप्रच्छः
याज्ञवल्क्येति होवाच,
मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु,
यज्ञमधीयानाः ।

तस्यासीद्भार्या गन्धर्वगृहीता ।
तमपृच्छामः
कोऽसीति ।
सोऽब्रवीत्
कबन्ध अथर्वण इति ।

pM2/k1

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्चः
वेत्थ नु त्वं,
काप्य,
तत्सूत्रं यस्मिन्नयं च लोकः
परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्तीति ।
सोऽब्रवीत्पतञ्चलः काप्योः
नाहं तद्
भगवन्
वेदेति ।

pM3/k1

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्चः
वेत्थ नु त्वं,
काप्य,
तमन्तर्यामिणं,
य इमं च लोकं
परं च लोकꣳ सर्वाणि च भूतान्यन्तरो यमयतीति ।
सोऽब्रवीत्पतञ्चलः काप्योः
नाहं तं,
भगवन्
वेदेति ।

pM4/k1

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्चः
यो वै तत्
काप्य,
सूत्रं विद्यात्तं चान्तर्यामिणꣳ,
स ब्रह्मवित्
स लोकवित्
स देववित्
स वेदवित्
स यज्ञवित्

K om.
स भूतवित्
स आत्मवित्
स सर्वविदिति तेभ्योऽब्रवीत् ।
तदहं वेद ।
तच्चेत्त्वं,
याज्ञवल्क्य,
सूत्रमविद्वाꣳस् तं चान्तर्यामिणं ब्रह्मगवीरुदजसे,
मूर्धा ते विपतिष्यतीति ।

pM5/k1

वेद वा अहं,
गौतम,
तत्सूत्रं तं चान्तर्यामिणमिति ।
यो वा इदं कश्च ब्रूयाद्
वेद वेदेति ।
यथा वेत्थ,

तथा ब्रूहीति ।

pM6/k2

K sa hovachaH
वायुर्वै,
गौतम,
तत्सूत्रं;
वायुना वै,
गौतम,
सूत्रेणायं च लोकः परश्च
लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति ।
तस्माद्वै,
गौतम,
पुरुषं प्रेतमाहुः
व्यस्र꣸सिषतास्याङ्गानीति;
वायुना हि,
गौतम,
सूत्रेण सम्दृब्धानि भवन्तीति ।
एवमेवैतद्

K om. eva
याज्ञवल्क्यान्तर्यामिणं ब्रूहीति ।

pM7/k3

यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो,
यं पृथिवी न वेद,
यस्य पृथिवी शरीरं,
यः पृथिवीमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM8/k4

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो,
यमापो न विदुः
यस्यापः शरीरं,
योऽपोऽन्तरो यमयति
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM9/k5

योऽग्नौ तिष्ठन्नग्नेरन्तरो,
यमग्निर्न वेद,
यस्याग्निः शरीरं,
योऽग्निमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM10/k6

योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो,
यमन्तरिक्षं न वेद,
यस्यान्तरिक्षꣳ शरीरं,

योऽन्तरिक्षमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM11/k7

यो वायौ तिष्ठन्वायोरन्तरो,
यं वायुर्न वेद,
यस्य वायुः शरीरं,
यो वायुमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pk8

add. K
यो दिवि तिष्ठन्दिवोऽन्तरो,
यं द्यौर्न वेद,
यस्य द्यौः शरीरं,
यो दिवमन्तरो यमयति
एष त आत्मान्तर्याम्यमृतः ।

pM12/k9

य आदित्ये तिष्ठन्नादित्यादन्तरो,
यमादित्यो न वेद,
यस्यादित्यः शरीरं,

य आदित्यमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM13/k11

यश्चन्द्रतारके तिष्ठङ्श्चन्द्रतारकादन्तरो,
यं चन्द्रतारकं न वेद,
यस्य चन्द्रतारकꣳ शरीरं,
यश्चन्द्रतारकमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pk12

add. K
य आकाशे तिष्ठन्नाकाशादन्तरो,
यमाकाशो न वेद,
यस्याकाशः शरीरं,
य आकाशमन्तरो यमयति
एष त आत्मान्तर्याम्यमृतः ।

pM14/k10

यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो,
यं दिशो न विदुः
यस्य दिशः शरीरं,

यो दिशोऽन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM15/k om .

यो विद्युति तिष्ठन्विद्युतोऽन्तरो,
यं विद्युन्न वेद,
यस्य विद्युच्छरीरं,
यो विद्युतोऽन्तरो यमयति,
स त आत्मान्तर्याम्यमृतः ।

pM16/k om .

यो स्तनयित्नौ तिष्ठन्स्तनयित्नोरन्तरो,
यꣳ स्तनयित्नुर्न वेद,
यस्य स्तनयित्नुः शरीरं,
यो स्तनयित्नोरन्तरो यमयति,
स त आत्मान्तर्याम्यमृतः ।

pM17/k om .

यो सर्वेषु लोकेषु तिष्ठन्सर्वेभ्यो लोकेभ्योऽन्तरो,
यꣳ सर्वे लोका न विदुः
यस्य सर्वे लोकाः शरीरं,
यो सर्वेभ्यो लोकेभ्योऽन्तरो यमयति,
स त आत्मान्तर्याम्यमृतः ।

pM18/k om .

यो सर्वेषु वेदेषु तिष्ठन्सर्वेभ्यो वेदेष्वन्तरो,
यꣳ सर्वे वेदा न विदुः
यस्य सर्वे वेदाः शरीरं,
यो सर्वेभ्यो वेदेभ्योऽन्तरो यमयति,
स त आत्मान्तर्याम्यमृतः ।

pM19/k om .

यो सर्वेषु यज्ञेषु तिष्ठन्सर्वेभ्यो यज्ञेभ्योऽन्तरो,
यꣳ सर्वे यज्ञा न विदुः
यस्य सर्वे यज्ञाः शरीरं,
यो सर्वेभ्यो यज्ञेभ्योऽन्तरो यमयति,
स त आत्मान्तर्याम्यमृतः ।

pM20/k15

यः सर्वेषु भूतेषु तिष्ठन्त्सर्वेभ्यो भूतेभ्योऽन्तरो,
यꣳ सर्वाणि भूतानि न विदुः
यस्य सर्वाणि भुतानि शरीरं,
यः सर्वाणि भूतान्यन्तरो यमयति,
स

K eSha

त आत्मान्तर्याम्यमृत ।
इत्य् उ एवाधिभूतम्

K om. u eva

अथाध्यात्मम् ।

pM21/k16

यः प्राणे तिष्ठन्प्राणादन्तरो,
यं प्राणो न वेद,
यस्य प्राणः शरीरं,
यः प्राणमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM22/k17

यो वाचि तिष्ठन्वाचोऽन्तरो,
यं वाङ् न वेद,
यस्य वाक्षरीरं,
यो वाचमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM23/k18

यश्चक्षुषि तिष्ठङ्चक्षुषोऽन्तरो,
यं चक्षुर्न वेद,
यस्य चक्षुः शरीरं,
यश्चक्षुरन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM24/k19

यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो,
यꣳ श्रोत्रं न वेद,
यस्य श्रोत्रꣳ शरीरं,
यः श्रोत्रमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM25/k20

यो मनसि तिष्ठन्मनसोऽन्तरो,
यं मनो न वेद,
यस्य मनः शरीरं,
यो मनोऽन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM26/k21

यस् त्वचि तिष्ठꣳस् त्वचोऽन्तरो,
यं त्वङ् न वेद,
यस्य त्वक्शरीरं,
यस् त्वचमन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

## pk22

add. K
यो विज्ञाने तिष्ठन्विज्ञानादन्तरो,
यं विज्ञानं न वेद,
यस्य विज्ञानꣳ शरीरं,
यो विज्ञानमन्तरो यमयति
एष त आत्मान्तर्याम्यमृतः ।

## pM27/k14

यस् तेजसि तिष्ठꣳस् तेजसोऽन्तरो,
यं तेजो न वेद,
यस्य तेजः शरीरं,
यस् तेजोऽन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

## pM28/k13

यस् तमसि तिष्ठꣳस् तमसोऽन्तरो,
यं तमो न वेद,
यस्य तमः शरीरं,
यस् तमोऽन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM29/k23

यो रेतसि तिष्ठꣳ रेतसोऽन्तरो,
यं रेतो न वेद,
यस्य रेतः शरीरं,
यो रेतोऽन्तरो यमयति,
स

K eSha
त आत्मान्तर्याम्यमृतः ।

pM30/k om .

य आत्मनि तिष्ठन्नात्मनोऽन्तरो,
यमात्मा न वेद,
यस्यात्मा शरीरं,
य आत्मान्तरो यमयति,
स त आत्मान्तर्याम्यमृतः ।

pM31/k23

अदृष्टो द्रष्टाश्रुतः श्रोतामतो मन्ताविज्ञतो विज्ञाता ।
नान्योऽतोऽस्ति द्रष्टा,
नान्योऽतोऽस्ति श्रोता,
नान्योऽतोऽस्ति मन्ता,
नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतो ।
अतोऽन्यदार्तम् ।
ततो होद्दालक आरुणिरुपरराम ।

ch8

pMk1

अथ ह वाचक्रव्य् उवाचः
ब्राह्मणा भगवन्तो,
हन्ताहमिमं याज्ञवल्क्यं

K om.
द्वौ प्रश्नौ प्रक्ष्यामि;
तौ चेन्मे विवक्ष्यति

K om. vi
न वै

K om.
जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ।
तौ चेद्मे न विवक्ष्यति,
मुर्धास्य विपतिष्यतीति

K om. tau ...
पृच्छ, गार्गीति ।

pMk2

सा होवाचाहं वै त्वा, याज्ञवल्क्य !,
यथा काश्यो वा वैदेहो वोग्रपुत्र,
उज्ज्यं धनुरधिज्यं कृत्वा,
द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेद्
एवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम् ।
तौ मे ब्रूहीति ।
पृच्छ, गार्गीति ।

pMk3

सा होवाचः
यदूर्ध्वं,
याज्ञवल्क्य,
दिवो,
यदवाक्पृथिव्या,
यदन्तरा द्यावापृथिवी इमे,
यद्भूतं च भवच्च भविष्यच्चेत्य् आचक्षते,
कस्मिꣳस् तदोतं च प्रोतं चेति ।

pMk4

स होवाचः
यदूर्ध्वं,
गार्गि,
दिवो,
यदवाक्पृथिव्या,
यदन्तरा द्यावापृथिवी इमे,
यद्भूतं च भवच्च भविष्यच्चेत्य् आचक्षत,
आकाशे तदोतं च प्रोतं चेति ।

pMk5

सा होवचः
नमस् ते

K add..astu

याज्ञवल्क्य,
यो म एतं व्यवोचो ।
अपरस्मै धारयस्वेति ।

पृच्छ, गार्गीति ।

pMk6

सा होवाचः
यदूर्ध्वं,
याज्ञवल्क्य,
दिवो,
यदवाक्पृथिव्या,
यदन्तरा द्यावापृथिवी इमे,
यद्भूतं च भवच्च भविष्यच्चेत्य् आचक्षते,
कस्मिꣳस् तदोतं च प्रोतं चेति ।

pMk7

स होवाचः
यदूर्ध्वं,
गार्गि,
दिवो,
यदवाक्पृथिव्या,
यदन्तरा द्यावापृथिवी इमे,
यद्भूतं च भवच्च भविष्यच्चेत्य् आचक्षत,
आकाश एव तदोतं च प्रोतं चेति ।
कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ।

pMk8

स होवाचैतद्वै तदक्षरं,
गार्गि,
ब्राह्मणा अभिवदन्ति

अस्थूलमनणु
अह्रस्वमदीर्घम्
अलोहितमस्नेहम्
अच्छायमतमो,
अवाय्वनाकाशम्
असङ्गम्
अस्पर्शम्

K om.

अगन्धम्
अरसम्

K arasam agandham

अचक्षुष्कम्
अश्रोत्रम्
अवाग्
अमनो,
अतेजस्कम्
अप्राणम्
अमुखम्
अनामागोत्रम्
अजरम्
अमरम्
अभयम्
अमृतम्
अरजो,
अशब्दम्
अविवृतम्
असंवृतम्
अपूर्वम्
अनपरम्
अनन्तरम्

K pro anAma ... anantaram

schribitamAtram anantaram
अबाह्यं;
न तदश्नोति

K ashnAti
कं चन

kkiM chana
न तदश्नोति

K ashnAti
कश्चन ।

pMk9

एतस्य वा अक्षरस्य प्रशासने,
गार्गि,
द्यावापृथिवी विधृते तिष्ठत;
एतस्य वा अक्षरस्य प्रशासने,
गार्गि,
सूर्यचन्द्रमसौ विधृतौ तिष्ठत;
एतस्य वा अक्षरस्य प्रशासने,
गार्गि

K add. nimeShA muhUrtA
अहोरात्राणिऽ

kadd. ardhamAsA
`मासास्ऽ ऋतवस्ऽ संवत्सरास्ऽ

kadd. iti
विधृतास् तिष्ठन्तिऽ

K add. nimeShA muhUrtA

अहोरात्राण्य्

kadd. ardhamsA

`मासा ऋतवः संवत्सरा

kadd. iti

विधृतास् तिष्ठन्ति
एतस्य वा अक्षरस्य प्रशासने,
गार्गि,
प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः,
प्रतीच्योऽन्या,
यांयां च दिशम्

K add. anv

एतस्य वा अक्षरस्य प्रशासने,
गार्गि,
ददतं

K dadato

मनुष्याः प्रशसन्ति,
यजमानं देवा,
दर्व्यं

K darvIM

पितरोऽन्वायत्ताः ।

pMk10

यो वा एतदक्षरमविदित्वा,
गार्गि

K gArgi aviditvA

अस्मिꣳल् लोके जुहोति,
ददाति

K yajate
तपस्यतिऽ अपि

K tap̀as tap̀yate
बहूनि वर्षसहस्राणिऽ अन्तवन्

kantavad
एवऽ अस्य स लोकस्ऽ

ktad

pro sa loko
भवति
यो वा एतदक्षरमविदित्वा,
गार्ग्य्

K gArgi aviditvA
अस्माल् लोकात्प्रैति,
स कृपणो;
अथ य एतदक्षरं,
गार्गि,
विदित्वास्माल् लोकात्प्रैति,
स ब्राह्मणः ।

pMk11

तद्वा एतदक्षरं,
गार्गि
अदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ;
नान्यद्

K add. ato
अस्ति द्रष्टृ,
नान्यद्

K add. ato
अस्ति श्रोतृ,
नान्यद्
K add. ato
अस्ति मन्तृ,
नान्यद्
K add. ato
अस्ति विज्ञात्रेतद्वै अक्षरं,
गार्गि,
यस्मिन्
kvij natretasminnu`khal̀vakShare, gArgy),
आकाश ओतश्च प्रोतश्च ।

pMk12

सा होवाचः
ब्राह्मणा भगवन्तः
तदेव बहु मन्यध्वम्ऽ
यदस्मान्नमस्कारेण मुच्याध्वम्ऽ
K muchyedhvam
न वै जातु युष्माकमिमम्ऽ कश्चिद्ब्रह्मोद्यम्ऽ जेताऽ इति
ततो ह वाचक्नव्य् उपरराम ।

ch9

pMk1

अथ हैनं विदग्धः शाकल्यः पप्रच्छ
कति देवा,
याज्ञवल्क्येति ।
स हैतयैव निविदा प्रतिपेदे,
यावन्तस्ऽ वैश्वदेवस्य निविदिऽ उच्यन्ते
त्रयश्च त्री च शता त्रयस्ऽ च त्री च सहस्राऽ इतिऽ
ओम् इति होवाच;

pM2/k1

कत्य् एव देवा,
याज्ञवल्क्येति ।
त्रयस्त्रिꣳशदिति ।
ओमिति होवाच ।
कत्य् एव देवा,
याज्ञवल्क्येति ।
षड् इति ।
ओमिति होवाच ।
कत्य् एव देवा,
याज्ञवल्क्येति ।
त्रय इति ।
ओमिति होवाच ।
कत्य् एव देवा,
याज्ञवल्क्येति ।
द्वाविति ।
ओमिति होवाच ।
कत्य् एव देवा,
याज्ञवल्क्येति ।
अध्यर्ध इति ।
ओमिति होवाच ।
कत्य् एव देवा,

याज्ञवल्क्येति ।
एक इति ।
ओमिति होवाच ।
कतमे ते त्रयश्च त्री
च शता त्रयश्च त्री च सहस्रेति ।

pM3/k2

स होवाचः
महिमान एवैषामेते,
त्रयस्त्रिंशत्त्वेव देवा इति ।
कतमे ते त्रयस्त्रिꣳशदिति ।
अष्टौ वसव,
एकादश रुद्रा,
द्वादशादित्याः
त एकत्रिंशद्
९न्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति ।

pM4/k3

कतमे वसव इति ।
आग्निश्च पृथिवी च वायुश्चान्तरिक्षं
चादित्यश्च ड्यौः च चन्द्रमाश्च णक्षत्राणि चैते वसव;
एतेषु हीदꣳ सर्वꣳ वसु
K om.
हितं
kadd. ity
एते हीदꣳ सर्वं वसयन्ते ।
तद्यदिदꣳ सर्वं वसयन्ते

K om. ete hIdaꣳ ...
तस्माद्वसव इति ।

pM5/k4

कतमे रुद्रा इति ।
दशेमे पुरुषे प्राणा,
आत्मैकादशस्;
ते यदास्मान्मर्त्याच्छरीराद्

K sharIrAnmartyAd
उत्क्रामन्ति
अथ रोदयन्तिः
तद्यद्रोदयन्ति,
तस्माद्रुद्रा इति ।

pM6/k5

कतम अदित्या इति ।
द्वादश

K add. vai
मासाः संवत्सरस्यैत अदित्या;
एते हीदꣳ सर्वमाददाना यन्ति;
तद्

K te
यदिदꣳ सर्वमाददाना यन्ति,
तस्मादादित्या इति ।

pM7/k6

कतम ९न्द्रः,
कतमः प्रजापतिरिति ।
स्तनयित्नुरेवेन्द्रो,
यज्ञः प्रजापतिरिति ।
कतमः स्तनयित्नुरिति ।
अशनिरिति ।
कतमो यज्ञ इति ।
पशव इति ।

pM8/k7

कतमे षड् इति ।
आग्निश्च पृथिवी च वायुश्चान्तरिक्षश्चादित्यश्च
द्यौश्चैते षड् इत्य्

K om. ity

एते ह्य् एवेद९

K hIda९

सर्वं षड् इति ।

pM9/k8

कतमे ते त्रयो देवा इती-
-म एव त्रयो लोका,
एषु हीमे सर्वे देवा इति ।
कतमौ

K add. tau

द्वौ देवाविति ।
अन्नं चैव प्राणश्चेति ।
कतमोऽध्यर्ध इति ।

योऽयं पवत इति ।

### pM10/k9

तदाहुः
यदयमेक एव

K eka ivaiva

पवते,
अथ कथमध्यर्ध इति ।
यदस्मिन्निदꣳ सर्वमध्यार्ध्नोत्
तेनाध्यर्ध इति ।
कतम एको देव इति ।

K prANa iti;

स ब्रह्म त्यदित्य् आचक्षते ।

### pM11/k10

पृथिव्य् एव यस्यायतनं,
चक्षुर्

K agnir

लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।
वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं,
यमात्थ;
य एवायꣳ शारीरः पुरुषः,
स एष ।

वदैव,
हाकल्य,
तस्य का देवतेति ।
स्त्रिय

K amRitam
इति होवाच ।

pM14/k11

काम एव यस्यायतनं,
चक्षुर्

K hRidayaM
लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणँ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।
वेद वा अहं तं पुरुषँ सर्वस्यात्मनः परायणं,
यमात्थ;
य एवासौ चन्द्रे

K evAyaM kAmamayaH
पुरुषः,
स एष ।
वदैव,
हाकल्य,
तस्य का देवतेति ।
मन

K striya
इति होवाच ।

## pMk12

रूपाण्य् एव यस्यायतनं,
चक्षुर्लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।
वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं,
यमात्थ;
य एवासावादित्ये पुरुषः,
स एष ।
वदैव,
हाकल्य,
तस्य का देवतेति ।
चक्षुर्

K satyam
इति होवाच ।

## pMk13

आकश एव यस्यायतनं,
चक्षुर्

K shrotraM
लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।

वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं,
यमात्थ;
य एवायम्वायौ

K shrautaH prAtishrutaH
पुरुषः,
स एष ।
वदैव,
हाकल्य,
तस्य का देवतेति ।
प्राण

K disha
इति होवच ।

pM15/k om .

तेज एव यस्यायतनं,
चक्षुर्लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।
वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं,
यमात्थ;
य एवायमग्नौ पुरुषः,
स एष ।
वदैव,
हाकल्य,
तस्य का देवतेति ।
वागिति होवाच ।

pM16/k14

तम एव यस्यायतनं,
चक्षुर्
K hRidayaM
लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।
वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं,
यमात्थ;
य एवायं छायामयः पुरुषः,
स एष ।
वदैव,
हाकल्य,
तस्य का देवतेति ।
मृत्यु इति होवाच ।

pM17/k16

आप एव यस्यायतनं,
चक्षुर्
K hRidayaM
लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।
वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं,

यमात्थ;
य एवायं अप्सु पुरुषः,
स एष ।
वदैव,
हाकल्य,
तस्य का देवतेति ।
वरुण इति होवाच ।

pM18/k17

रेत एव यस्यायतनं,
चक्षुर्

K hRidayaM
लोको,
मनो ज्योतिः
यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ,
स वै वेदिता स्याद्
याज्ञवल्क्य ।
वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं,
यमात्थ;
य एवायं पुत्रमयः पुरुषः,
स एष ।
वदैव,
हाकल्य,
तस्य का देवतेति ।
प्रजापतिरिति होवाच ।

pM19/k18

हा॒कल्ये॒ति होवाच या॒ज्ञवल्क्यः
त्वा॒ꣳ स्विदि॒मे ब्राह्म॒णा अङ्गारावक्ष॒यणमक्रता३ इ॒ति ।

pM20/k19

या॒ज्ञवल्क्ये॒ति होवाच हा॒कल्यो,
य॒दि॒दं कुरुपञ्चा॒लानां ब्राह्मना॒नत्य॒वादीः,
किं॒ ब्र॒ह्म वि॒द्वा॒निति ।
दि॒शो वेद स॒देवाः स॒प्रतिष्ठा इ॒ति ।
य॒द्दि॒शो वे॒त्थ स॒देवाः स॒प्रतिष्ठाः,

pM21/k20

कि॒न्देवतोऽस्यां॒ प्राच्यां दिश्य॒सी॒ति ।
आदित्य॒देवत इ॒ति ।
स॒ आदित्यः॒ क॒स्मिन्प्र॒तिष्ठित इ॒ति ।
च॒क्षु॒षीति ।
क॒स्मि॒न्नु च॒क्षुः प्र॒तिष्ठितं भवती॒ति

K om. bhavati

रू॒पे॒ष्विति;
च॒क्षुषा हि॒ रूपा॒णि प॒श्यति ।
क॒स्मि॒न्नु रूपा॒णि प्र॒तिष्ठितानि भवन्ती॒ति

K om. bhavanti

हृदय इ॒ति होवाच;
हृदयेन हि॒ रूपा॒णि जाना॒ति,
हृदये ह्य् ए॒व॒ रूपा॒णि प्र॒तिष्ठितानि भवन्ती॒ति ।
ए॒वमे॒वै॒तद्
याज्ञवल्क्य ।

pM22/k21

किन्देवतोऽस्यां दक्षिणायां दिश्यसीति ।
यमदेवत इति ।
स यमः कस्मिन्प्रतिष्ठित इति ।

kadd. yaj na iti.
दक्षिणायामिति ।
कस्मिन्नु दक्षिणा प्रतिष्ठिता भवतीति

K om. bhavati
श्रद्धायामिति;
यदा ह्य् एव श्रद्धत्ते,
अथ दक्षिणां ददाति;
श्रद्धायाँ ह्य् एव दक्षिणा प्रतिष्ठिता भवतीति

K om. bhavati
कस्मिन्नु श्रद्धा प्रतिष्ठिता भवतीति

K om. bhavati
हृदय इति होवाच;
हृदयेन हि श्रद्धत्ते

K shraddhAM jAnAti
हृदये ह्य् एव श्रद्धा प्रतिष्ठिता ! भवतीति ।
एवमेवैतद्
याज्ञवल्क्य ।

pM23/k22

किन्देवतोऽस्यां प्रतीच्यां दिश्यसीति ।
वरुणदेवत इति ।
स वरुणः कस्मिन्प्रतिष्ठित इति ।
अप्स्विति ।

कस्मिन्न्वापः प्रतिष्ठिता भवन्तीति

K om. bhavanti

रेतसीति ।
कस्मिन्नु रेतः प्रतिष्ठितं भवतीति

K om. bhavati

हृदय,
इति

K add. hovAcha

तस्मादपि प्रतिरूपं जातमाहुः
हृदयादिव सृप्तो,
हृदयादिव निर्मित इति;
हृदये ह्य् एव रेतः प्रतिष्ठितं भवतीति ।
एवमेवैतद्
याज्ञवल्क्य ।

pM24/k23

किन्देवतोऽस्यामुदीच्यां दिश्यसीति ।
सोमदेवत इति ।
स सोमः कस्मिन्प्रतिष्ठित इति ।
दीक्षायामिति ।
कस्मिन्नु दिक्षा प्रतिष्ठिता भवतीति

K om. bhavati

सत्य इति;
तस्मादपि दीक्षितमाहुः
सत्यं वदेति;
सत्ये ह्य् एव दीक्षा प्रतिष्ठिता भवतीति

K om. bhavati

कस्मिन्नु सत्यं प्रतिष्ठितम्भवतीति

K om. bhavati

हृदये इति

K add. hovAcha

हृदयेन हि सत्यं जानाति;
हृदये ह्य् एव सत्यं प्रतिष्ठितं भवतीति ।
एवमेवैतद्
याज्ञवल्क्य ।

pM25/k24

किन्देवतोऽस्यां ध्रुवायां दिश्यसीति ।
अग्निदेवत इति ।
सोऽग्निः कस्मिन्प्रतिष्ठितो भवतीति

K om. bhavati

वाचीति ।
कस्मिन्नु वाक्प्रतिष्ठिता भवतीति

K om. bhavati

मनसीति

K hRidaya iti

कस्मिन्नु मनस्

K hRidayaM

प्रतिष्ठितं भवतीति

kom. bhavati

pM26/k25

अहल्लिकेति होवाच याज्ञवल्क्यो,
यत्रैतदन्यत्रास्मन्मन्यासै ।

यत्रैतद्

K yaddhy etad
अन्यत्रास्मत्स्याच्,
छ्वानो वैनदद्युः
वयाँसि वैनद्विमथ्नीरन्निति ।

pM27/k26

कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ ! स्थ इति ।
प्राण इति ।
कस्मिन्नु प्राणः प्रतिष्ठित इति ।
अपान इति ।
कस्मिन्न्वपानः प्रतिष्ठित इति ।
व्यान इति ।
कस्मिन्नु व्यानः प्रतिष्ठित इति ।
उदान इति ।
कस्मिन्नूदानः प्रतिष्ठित इति ।
समान इति ।

pM28/k26

स एषः
नेति,
नेत्य् आत्मागृह्यो,
न हि गृह्यते;
अशीर्यो,
न हि शीर्यते;
असङ्गोऽसितो न सज्यते,
न व्यथत इत्य्
असितो न व्यथते,

एतान्यष्टावायतनानि
अष्टौ लोका,

K add. aShTau devAH
अष्टौ पुरुषाः ।
स यस् तान्पुरुषान्व्युदुह्य

K niruhya
प्रत्युह्यात्यक्रामीत्
तं त्वौपनिषदं पुरुषं पृच्छामि ।
तं चेन्मे न विवक्ष्यसि,
मूर्धा ते विपतिष्यतीति ।
तꣳ ह हाकल्यस् न मेने

K taꣳ ha na mene hAkalyas
तस्य ह मूर्धा विपपात;
तस्य हाप्यन्यन्मन्यमानाः परिमोषिणोऽस्थिन्यपजह्रुः

K api hAsya parimoShiNo.asthInyapajahruHanyaǹmanyamAnAH

pM29/k27

अथ याज्ञवल्क्यो होवाच

K hovAcha yAj navalkyo
ब्राह्मणा भगवन्तो,
यो वः कामयते,
स मा पृच्छतु,
सर्वे वा मा पृच्छत;
यो वः कामयते,
तं वः पृच्छामि,
सर्वान्वा वः पृच्छामीति ।
ते ह ब्राह्मणा न दधृषुः ।

pM30/k28

तान्हैतैः श्लोकैः पप्रच्छः
यथा वृक्षो वनस्पतिः
तथैव पुरुषोऽमृषाः
तस्य पर्णानि लोमानि

K lomAni parNAni
त्वगस्योत्पाटिका बहिः ।

pM31/k28

त्वच एवास्य रुधिरं
प्रस्यन्दि त्वच उत्पटस्;
तस्मात्तदातुन्नात्

K AtRiNNAt
प्रैति,
रसो वृक्षादिवाहतात् ।

pM32/k28

माꣳसान्यस्य शकराणि,
किनाटꣳ स्नाव,
तत्स्थिरम्;
अस्थीन्यन्तरतो दारुणि,
मज्जा मज्जोपमा कृता ।

pM33/k28

यद्वृक्षो वृक्णो रोहति
मूलान्नवतरः पुनः
मर्त्यः स्विन्मृत्युना वृक्णः
कस्मान्मूलात्प्ररोहति ।

pMk34/k28

K variato ordineH 3-4 post9-10
रेतस इति मा वोचतः
जीवतस् तत्प्रजायते;
जात एव न जायते,
को न्वेनं जनयेत्पुनः
धानारुह

K add. iva
वै वृक्षो
अन्यतः

K a NjasA
प्रेत्य सम्भवो ।
यत्समूलमुद्वृहेयुर्

K AvRiheyur
वृक्षं,
न पुनराभवेद्;
मर्त्यः स्विन्मृत्युना वृक्णः
कस्मान्मूलात्प्ररोहति ।
विज्ञानमानन्दं ब्रह्म,
रातेर्

K rAtir
दातुः,
परायणं

तिष्ठमानस्य तद्विद इति ।

ch4

ch1 = hbM 14.6.10?? = hbk16.6.1??

pMk1

जनको ह वैदेह आसां चक्रे ।
अथ ह याज्ञवल्क्य आवव्राज ।
स होवाच जनको वैदेहो

K ta꣡ hovAcha

याज्ञवल्क्य,
किमर्थमचारीः,
पशूनिच्छन्नण्वन्तानीति ।
उभयमेव,
स꣡राड्,
इति होवाच ।

pM2/k3

K add. yadeva te kashchidabravIt tachChRiNavAmety.

अब्रवीन्म ऊदङ्कः हौल्वायनः

K haulbAyanaH

प्राणो वै ब्रह्मेति ।
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
तथा तच्छौल्वायनो

K ChaulbAyano
अब्रवीत्
प्राणो वै ब्रह्मेति,
अप्राणतो हि किꣳ स्यादिति ।
अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।
न मेऽब्रवीदिति ।
एकपाद्वा एतत्
सम्राड्,
इति ।

pMk3

स वै नो ब्रूहि,
याज्ञवल्क्य ।
स

K prANa
एवायतनम्
आकाशः प्रतिष्ठा,
प्रियमित्य् एनदुपासीत ।
का प्रियता,
याज्ञवल्क्य ।
प्राण एव,
सम्राड्,
इति होवाच;
प्राणस्य वै,
सम्राट्,
कामायायाज्यं याजयति
अप्रतिगृह्यस्य प्रतिगृह्णाति
अपि तत्र वधाशङ्का

K vadhAshaNkA
भवति,
यां दिशमेति प्राणस्यैव,
सम्राट्,
कामाय;
प्राणो वै,
सम्राट्,
परमं ब्रह्म ।
नैनं प्राणो जहाति,
सर्वाण्य् एनं भूतान्यभिक्षरन्ति ।

pM4/k3

देवो भूत्वा देवानप्येति,
य एवं विद्वानेतदुपास्ते ।
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहह् ।
स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत,
नाननुशिष्य हरेतेति ।
क एव ते किमब्रवीदिति

K om. ka`...

pM5/k2

K add. yatte kashchidabravIttachChRiNavAmety.
अब्रवीन्मे जित्वा हैलिनो

K hailinir
वाग्वै ब्रह्मेति ।
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्

तथा तच्छैलिनो

K Chailinir

अब्रवीद्

वाग्वै ब्रह्मेति

अवदतो हि किꣳ स्यादिति ।

अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।

न मेऽब्रवीदिति ।

एकपाद्वा एतत्

सम्राड्,

इति ।

pM6/k2

स वै नो ब्रूहि,

याज्ञवल्क्य ।

वागेवायतनम्

आकाशः प्रतिष्ठा,

प्रज्ञेत्य् एनदुपासीत ।

का प्रज्ञता,

याज्ञवल्क्य ।

वागेव,

सम्राड्,

इति होवाच;

वाचा वै,

सम्राड्,

बन्धुः प्रज्ञायत;

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः

पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि

K add. iShTaꣳ

hutamAshitaM pAyitamayaM cha lokaH parashcha lokaH sarvANi cha bhUtAni
वाचैव,
संराट्,
प्रज्ञायन्ते;
वाग्वै,
सम्राट्,
परमं ब्रह्म;
नैनं वाग्जहाति,
सर्वाण्य् एनं भूतान्यभिक्षरन्ति ।

pM7/k2

देवो भूत्वा देवानप्येति,
य एवं विद्वानेतदुपास्ते ।
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत,
नाननुशिष्य हरेतेति ।
क एव ते किमब्रवीदिति

K om. ka`...

pM8/k4

K add. yadeva te kashchidabravIttachChRiNavAmety.
अब्रवीन्मे बर्कुर्वार्ष्णश्:
चक्षुर्वै ब्रह्मेति ।
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
तथा तद्वार्ष्णोऽब्रवीच्:
चक्षुर्वै ब्रह्मेति

अपश्यतो हि किꣳ स्यादिति ।
अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।
न मेऽब्रवीदिति ।
एकपाद्वा एतत्
सम्राड्,
इति ।

pM9/k4

स वै नो ब्रूहि,
याज्ञवल्क्य ।
चक्षुरेवायतनम्
आकाशः प्रतिष्ठा,
सत्यमित्य् एतदुपासीत ।
का सत्यता,
याज्ञवल्क्य ।
चक्षुरेव,
सम्राड्,
इति होवाच;
चक्षुषा वै,
सम्राट्,
पश्यन्तमाहुः
अद्राक्षीरिति ।
स आहाद्राक्षमिति,
तत्सत्यं भवति;
चक्षुर्वै,
सम्राट्,
परमं ब्रह्म;
नैनम्चक्षुर्जहाति,
सर्वाण्य् एनं भूतान्यभिक्षरन्ति ।

pM10/k4

देवो भूत्वा देवानप्येति,
य एवं विद्वानेतदुपास्ते ।
हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत,
नाननुशिष्य हरेतेति ।
क एव ते किमब्रवीदिति

K om. ka`...

pM11/k5

K add. yadeva te kashchidabravIt tachChRiNavAmety.
अब्रवीन्मे गर्दभीविपीतो भारद्वाजः
श्रोत्रं वै ब्रह्मेति;
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
तथा तद्भारद्वाजोऽब्रवीच्:
छ्रोत्रं वै ब्रह्मेति
अशृण्वतो हि किꣳ स्यादिति ।
अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।
न मेऽब्रवीदिति ।
एकपाद्वा एतत्
सम्राड्,
इति ।

pM12/k5

स वै नो ब्रूहि,
याज्ञवल्क्य ।
श्रोत्रमेवायतनम्
आकाशः प्रतिष्ठानन्तमित्य् एनदुपासीत ।
कानन्तता,
याज्ञवल्क्य ।
दिश एव,
सम्राड्,
इति होवाच;
तस्माद्वै,
सम्राड्,

K add. api
यां काङ्‌ दिशं गच्छति नैवास्या अन्तं गच्छति
अनन्ता हि दिशः,
श्रोत्रꣳ हि दिशः

kdisho vai,
सम्राट्,

shrotraꣳ
श्रोत्रं वै,
सम्राट्,
परमं ब्रह्म ।
नैनं श्रोत्रं जहाति,
सर्वाण्य् एनं भूतान्यभिक्षरन्ति ।

pM13/k5

देवो भूत्वा देवानप्येति,
य एवं विद्वानेतदुपास्ते ।
हस्त्य्‌षभꣳ सहस्रं ददामीति,

होवाच जनको वैदेहः ।
स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत,
नाननुशिष्य हरेतेति ।
क एव ते किमब्रवीदिति

K om. ka`...

pM14/k6

kadd. yadeva te kashchidabravIt

tachChRiNavAmety.
अब्रवीन्मे षत्यकामो जाबालोः
मनो वै ब्रह्मेति;
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
तथा तत्षत्यकामो

K jAbAlo
अब्रवीद्
मनो वै ब्रह्मेति
अमनसो हि किꣳ स्यादिति ।
अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम् ।
न मेऽब्रवीदिति ।
एकपाद्वा एतत्
सम्राड्,
इति ।

pM15/k6

स वै नो ब्रूहि,
याज्ञावल्क्य ।

मन एवायतनम्
आकाशः प्रतिष्ठानन्द इत्य् एनदुपासीत ।
कानन्दता,
याज्ञवल्क्य ।
मन एव,
सम्राड्,
इति होवाच;
मनसा वै,
सम्राट्,
स्त्रियमभिहर्यति

K abhihAryate

तस्यां प्रतिरूपः पुत्रो जायते;
स आनन्दो ।
मनो वै,
सम्राट्,
परमं ब्रह्म;
नैनं मनो जहाति,
सर्वाण्य् एनं भूतान्यभिक्षरन्ति ।

pM16/k6

देवो भूत्वा देवानप्येति,
य एवं विद्वानेतदुपास्ते ।
हस्त्य्षभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत,
नाननुशिष्य हरेतेति ।
क एव ते किमब्रवीदिति

K om. ka`...

pM17/k7

kadd. yadeva te kashchidabravIt

tachChRiNavAmety.
अब्रवीन्मे विदग्धः हाकल्योः
हृदयं वै ब्रह्मेति;
यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्
तथा तच्छाकल्योऽब्रवीद्
धृदयं वै ब्रह्मेति
अहृदयस्य हि किꣳ स्यादिति ।
अब्रवीत्तु ते तस्यायतनं प्रतिष्ठां ! ।
न मेऽब्रवीदिति ।
एकपाद्वा एतत्
सम्राड्,
इति ।

pM18/k7

स वै नो ब्रूहि,
याज्ञवल्क्य ।
हृदयमेवायतनम्
आकाशः प्रतिष्ठा;
स्थितिरित्य् एनदुपासीत ।
का स्थितिता,
याज्ञवल्क्य ।
हृदयमेव,
सम्राड्,
इति होवाच;
हृदयं वै,
सम्राट्,

सर्वेषां भूतानामायतनꣳ;
हृदयं वै,
सम्राट्,
सर्वेषां भूतानां प्रतिष्ठा,
हृदये ह्य् एव,
सम्राट्,
सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति;
हृदयं वै,
सम्राट्,
परमं ब्रह्म;
नैनꣳ हृदयं जहाति,
सर्वाण्य् एनं भूतान्यभिक्षरन्ति ।

pM19/k7

देवो भूत्वा देवानप्येति,
य एवं विद्वानेतदुपास्ते ।
हस्त्य्षभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।
स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत नाननुशिष्य हरेतेति ।
क एव ते किमब्रवीदिति

K om. ka`...

ch2 = hbM 14.6.11?? = hbk16.6.2??

pMk1

अथ ह जनको

K janako ha

वैदेहः कूर्चादुपावसर्पन्नुवाचः
नमस् ते

K add..astu

याज्ञवल्क्यानु मा शाधीति ।
स होवाचः
यथा वै,
सम्राड्,
महान्तमध्वानमेष्यन्रथं वा नावं वा
समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्मासि
एवं वृन्दारक आढ्यः सन्नधीतवेद
उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति ।
नाहं तद्
भगवन्
वेद यत्र गमिष्यामीति ।
अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ।
ब्रवीतु भगवानिति ।

pMk2

स होवाच

K om.

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्;
तं वा एतमिन्धꣳ सन्तमिन्द्र
इत्य् आचक्षते परोक्षेणैव;
परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ।

pMk3

अथैतद्वामेऽक्षिणि

krishna.akShan

पुरुषरूपम्

एषास्य पत्नी विराट्,

तयोरेष सꣳस्तावो य एषोऽन्तर्हृदय आकाशो ।

अथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डो ।

अथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये

जालकमिवाथैनयोरेषा सृतिः

सती

K om.

सञ्चरणी यैषा हृदयादूर्ध्वा नाड्य् उच्चरति ।

pM4/k3

ता वा अस्यैता हिता

नाम नाड्यो यथ केशः सहस्रधा भिन्न

K yathA keshaH

sahasradhA bhinna evamasyaitA hitA nAma nADyo.antarhRidaye pratiShThitA bhavanty

एताभिर्वा एतम्

K etad

आस्रवदास्रवति;

तस्मादेष प्रविविक्ताहारतर इव भवत्यस्माच्छारीरादात्मनः ।

pM5/k4

तस्य वा एतस्य पुरुषस्य

K om. vA ...

प्राची दिक्प्राञ्चः प्राणा,

दक्षिणा दिग्दक्षिणाः प्राणाः,
प्रतीची दिक्प्रत्यञ्चः प्राणा,
उदीची दिगुदञ्चः प्राणा,
ऊर्ध्वा दिगूर्ध्वाः प्राणा,
अवाची दिगवाञ्चः प्राणाः,
सर्वा दिशः सर्वे प्राणाः ।

pM6/k4

स एष नेति नेत्य्
आत्मागृह्यो न हि गृह्यतेऽशीर्यो न हि
शीर्यतेऽसङ्गोऽसितो न सज्यते न व्यथते

krishna.asaNgo na hi sajyate asito na vyathate na riShyaty

अभयं वै,
जनक,
प्राप्तोऽसीति होवाच याज्ञवल्क्यः ।
स होवाच जनको वैदेहोः
नमस् ते,
याज्ञवल्क्याभयं त्वागच्छताद्यो नो,
भगवन्
अभयं वेदयस

K add.:
स होवाच जनको वैदेहोऽभयं त्वागच्छताद्
याज्ञवल्क्य,
यो नो,
भगवन्
अभयं वेदयसे;
नमस् तेऽस्तु
इमे विदेहा अयमहमस्मीति ।

ch3 = hbM 14.7.1 = hbk16.6.3

pMk1

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगामः
समेनेन वदिष्य इत्य्

K sa meneH na vadiShya ity

अथ ह यज् जनकश्च
वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदतुस्

K samUdAte

तस्मै ह याज्ञवल्क्यो वरं ददौ ।
स ह कामप्रश्नमेव वव्रे ।
तꣳ हास्मै ददौ ।
तꣳ ह सम्राड् एव पूर्वः पप्रच्छ ।

pMk2

याज्ञवल्क्य,
किञ्ज्योतिरयं पुरुष इति ।
आदित्यज्योतिः,
सम्राड्,
इति होवाचादित्येनैवायं ज्योतिषास्ते पल्ययते
कर्म कुरुते विपर्येतीति ।
एवमेवैतद्
याज्ञवल्क्य ।

pMk3

अस्तमित आदित्ये,
याज्ञवल्क्य,
किञ्ज्योतिरेवायं पुरुष इति ।
चन्द्रज्योतिः,
सम्राड्,
इति होवाच;
चन्द्रेणैवायं

K chandramA evAsya jyotirbhavati chandramasaivAyaM
ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति ।
एवमेवैतद्
याज्ञवल्क्य ।

pMk4

अस्तमित आदित्ये,
याज्ञवल्क्य,
चन्द्रमस्यस्तमिते,
किञ्ज्योतिरेवायं पुरुष इति ।
अग्निर्ज्योतिः,
सम्राड्,
इति होवाच

K agnirevAsya jyotirbhavaty
अग्निनैव ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति ।
एवमेवैतद्
याज्ञवल्क्य ।

pMk5

अस्तमित आदित्ये,
याज्ञवल्क्य,

चन्द्रमस्यस्तमिते,
शान्तेऽग्नौ,
किञ्ज्योतिरेवायं पुरुष इति ।
वाग्ज्योतिः,
सम्राड्, !
इति होवाच

K vAgevAsya jyotirbhavati
वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येति ।
तस्माद्वै,
सम्राड्,
अपि यत्र स्वः पाणिर्न विनिर्ज्ञायते,
अथ यत्र वागुच्चरति
उपैव तत्र न्येतीति ।
एवमेवैतद्
याज्ञवल्क्य ।

pMk6

अस्तमित आदित्ये,
याज्ञवल्क्य,
चन्द्रमस्यस्तमिते,
शान्तेऽग्नौ,
शान्तायां वाचि,
किञ्ज्योतिरेवायं पुरुष इति ।
आत्मज्योतिः,
सम्राड्,
इति होवाच

K AtmaivAsya jyotirbhavaty !
आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपर्येतीति ।

pMk7

कतम आत्मेति ।
योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः

K vij nAnamayaH prANeShu hRidyantar̀jyotiH puruShaH
स समानः सन्नुभौ लोकौ सञ्चरति

K anusa ncharati
ध्यायतीव लेलायतीव सधीः

K sa`hi
स्वप्नो भूत्वेमं लोकमतिक्रामति

kadd. mRityo rUpANi

pMk8

स वा अयं पुरुषो
जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः सꣳसृज्यते ।
स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति

K nijahAti
मृत्यो रूपाणि

kom.

pMk9

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवतः
इदं च परलोकस्थानं च;
सन्ध्यं तृतीयꣳ स्वप्नस्थानं;
तस्मिन्त्सन्ध्ये स्थाने तिष्ठनुभे स्थाने
पश्यतीदं च परलोकस्थानं च ।

pM10/k9

अथ यथाक्रमोऽयं परलोकस्थाने भवति;
तमाक्रममाक्रम्योभयान्पाप्मन आनन्दाꣳश्च पश्यति ।
स यत्रायं

K om.
प्रस्वपिति
अस्य लोकस्य सर्वावतो मात्रामपादाय,
स्वयं विहत्य स्वयं निर्माय
स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति
अत्रायं पुरुषः स्वयञ्ज्योतिर्भवति ।

pM11/k10

न तत्र रथा न रथयोगा न पन्थानो भवन्ति
अथ रथान्रथयोगान्पथः सृजते ।
न तत्रानन्दा मुदः प्रमुदो भवन्ति
अथानन्दान्मुदः प्रमुदः सृजते ।
न तत्र वेशान्ताः स्रवन्त्यः पुष्करिण्यो

K puShkariNyaH sravantyo
भवन्ति
अथ वेशान्तान्स्रवन्तीः पुष्करिणीः

K puShkariNIH sravantIH
सृजते;
स हि कर्ता ।

pM12/k11

तदप्य् एते श्लोकाः

K tadete shlokA bhavanti
स्वप्नेन शारीरमभिप्रहत्या-
-सुप्तः सुप्तानभिचाकशीति
शुक्रमादाय पुनरैति स्थानं
हिरण्मयः पौरुष

K puruSha
एकहꣳसः ।

pM13/k12

प्राणेन रक्षन्नपरं

K avaraM
कुलायं
बहिः कुलायादमृतश्चरित्वा,
स ईयतेऽमृतो यत्रकामं
हिरण्मयः पौरुष

K puruSha
एकहꣳसः ।

pM14/k13

स्वप्नान्त उच्चावचमीयमानो
रूपाणि देवः कुरुते बहून्य्
उतेव स्त्रीभिः सह मोदमानो
जक्षदुतेवापि भयानि पश्यन् ।

pM15/k14

आराममस्य पश्यन्ति
न तं कश्चन पश्यतीति

K pashyati kashchaneti
तं नायतं बोधयेदित्य् आहुः
दुर्भिषज्यꣳ हास्मै भवति,
यमेष न प्रतिपद्यते ।

pM16/k14

अथो खल्वाहुः
जागरितदेश एवास्यैस;
यानि ह्य् एव जाग्रत्पश्यति
तानि सुप्त इत्यत्रायं पुरुषः स्वयञ्ज्योतिर्भवतीति ।
एवमेवैतद्
याज्ञवल्क्यः

K om. iti ...
सोऽहं भगवते सहस्रं ददामि ।
अत ऊर्ध्वं विमोक्षायैव

K om.
ब्रूहीति ।

pM17/k15

sedchf. infra 40 : K 34
स वा एष एतस्मिन्त्स्वप्नान्ते

K samprasAde
रत्वा चरित्वा दृष्ट्वैव पुण्यं
च पापं च पुनः प्रतिन्यायं प्रतियोन्य् आद्रवति बुद्धान्तायैव

ksvapnAyaiva
स यदत्र

K tatra
किञ्चित्पश्यत्यनन्वागतस् तेन भवति
असङ्गो ह्ययं पुरुष इति ।
एवमेवैतद्
याज्ञवल्क्य ।
सोऽहं भगवते सहस्रं ददामि ।
अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।

pk16

add. K
स वा एष एतस्मिन्त्स्वप्ने
रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः
प्रतिन्यायं प्रतियोन्य् आद्रवति बुद्धान्तायैव;
स यत्तत्र किञ्चित्पश्यत्यनन्वागतस् तेन भवति
असङ्गो ह्ययं पुरुष इति ।
एवमेवैतद्
याज्ञवल्क्य ।
सोऽहं भगवते सहस्रं ददामि ।
अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।

pk17

add. K
स वा एष एतस्मिन्बुद्धान्ते
रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः
प्रतिन्यायं प्रतियोन्य् आद्रवति स्वप्नान्तायैव ।

pMk18

तद्यथा महामत्स्य उभे कूले
अनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एता
उभावन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं च

pMk19

तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो
वा विपरिपत्य रान्तः सꣳहत्य पक्षौ संलयायैव ध्रियत,
एवमेवायं पुरुष एतस्मा अन्ताय
धवति यत्र सुप्तो न कं चन कामं कामयते न
कं चन स्वप्नं पश्यति ।

pMk20

ता वा अस्यैता हिता
नाम नाड्यो यथा केशः सहस्रधा भिन्नस् तावताणिम्ना
तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा ।
अथ यत्रैनं घ्नन्तीव जिनन्तीव
हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं
पश्यति तदत्राविद्यया भयं

K om.

मन्यते ।
अथ यत्र राजेव देव इवाहम्

K deva iva rAjevAham

एव इदꣳ सर्वं

ksarvo

अस्मीति मन्यते सोऽस्य परमो लोको ।
अथ सुप्तो न कं
चन कामं कामयते न कं चन स्वप्नं पश्यति

K om. atha ...

pMk21

तद्वा अस्यैतदात्मकाममाप्तकाममकामं

K etadatichChando.apahatapApmAbhayaꣳ
रूपम् ।
तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो
न बाह्यं किं चन वेद नान्तरमेवमेवायं
पुरुषः शारिर आत्मा

K om. ambo
प्राज्ञनात्मना सम्परिष्वक्तो न
बाह्यं किं चन वेद नान्तरम् ।

pM22/k21

तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माभयꣳ

K etadAptakAmamAtmakAmamakAmaM
रूपमशोकान्तरम्

kShokAntaram

pM22/k22

अत्र पितापिता भवति मातामाता
लोका अलोका देवा अदेवा वेदा अवेदा यज्ञोऽयज्ञो

K om. ambo
अत्र स्तेनोऽस्तेनो भवति भ्रूणहाभ्रूणहा
पौल्कसोऽपौल्कसश्चाण्डालोऽचण्डालः

K chANDyAlo.achaNDyAlaH paulkaso.apaulkaso
श्रमणोऽश्रमणस् तापसोऽतापसोऽनन्वागतः पुण्येनानन्वागतः
पापेन;
तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ।

pMk23

यद्वै तन्न पश्यति,
पश्यन्वै तद्द्रष्टव्यं

K om.
न पश्यतिः
न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्;
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यत्पश्येत् ।

pMk24

यद्वै तन्न जिघ्रति,
जिघ्रन्वै तद्घ्रातव्यं

K om.
न जिघ्रति;
न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यज् जिघ्रेत् ।

pMk25

यद्वै तन्न रसयति,
विजानन्वै तद्रसं

K rasayanvai tan
न रसयति;
न हि रसयितू रसाद्

K rasayiter
विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यद्रसयेत् ।

pMk26

यद्वै तन्न वदति,
वदन्वै तद्वक्तव्यं

K om.
न वदति;
न हि वक्तुर्वचो

K vakter
विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यद्वदेत् ।

pMk27

यद्वै तन्न शृणोति,
शृण्वन्वै तच्छ्रोतव्यं

K om.
न शृणोति;
न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्

न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यच्छृणुयात् ।

pMk28

यद्वै तन्न मनुते,
मन्वानो वै तन्मन्तव्यं

K om.
न मनुते;
न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यन्मन्वीत ।

pMk29

यद्वै तन्न स्पृशति,
स्पृशन्वै तत्स्प्रष्टव्यं

K om.
न स्पृशति;
न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यत्स्पृशेत् ।

pMk30

यद्वै तन्न विजानाति,
विजानन्वै तद्विज्ञेयं

K om.
न विजानाति;

न हि विज्ञातुर्विज्ञानाद्

K vij nAter
विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यद्विजानीयात् ।

pk31

add. K
यत्र वा अन्यदिव स्यात्
तत्रान्योऽन्यत्पश्येद्
अन्योऽन्यज् जिघ्रेद्
अन्योऽन्यद्रसयेद्
अन्योऽन्यद्वदेद्
अन्योऽन्यच्छृणुयाद्
अन्योऽन्यन्मन्वीता
-न्योऽन्यत्स्पृशेद्
अन्योऽन्यद्विजानीयात् ।

pM31/k32

सलिल एको द्रष्टाद्वैतो भवति
एष ब्रह्मलोकः,
सम्राड्,
इति हैनमुवाचैषास्य

K iti hainamanushashAsa yAj navalkya. eShAs̀ya
परमा गतिः
एषास्य परमा सम्पद्
एषोऽस्य परमो लोक,

एषोऽस्य परम आनन्द,
एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।

pM32

pro m32-42, schribitkrishna 33-36; vide infra
स यो मनूष्याणाꣳ राद्धः
समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैः
कामैः सम्पन्नतमः,
स मनुष्याणां परम आनन्दः ।

pM33

pro m32-42, schribitkrishna 33-36; vide infra
अथ ये शतं मनुष्याणामानन्दाः,
स एकः पितॄणां जितलोकानामानन्दः ।

pM34

pro m32-42, schribitkrishna 33-36; vide infra
अथ ये शतं पितॄणां जितलोकानामानन्दाः,
स एकः कर्मदेवानामानन्दो,
ये कर्मणा देवत्वमभिसम्पद्यन्ते ।

pM35

pro m32-42, schribitkrishna 33-36; vide infra
अथ ये शतं कर्मदेवानामानन्दाः,

स॒ ए॒क आजा॒नदेवानामानन्दो॒,
य॒श्च [+]+[/+]श्रो॒त्रियोऽवृजिनो॒ऽकामहतः ।

## pM36

pro m32-42, schribitkrishna 33-36; vide infra
अ॒थ ये॒ शत॒मा॒जानदेवानामानन्दाः॒,
स॒ ए॒को देवलो॒क आनन्दो॒,
य॒श्च [+]+[/+]श्रो॒त्रियोऽवृजिनो॒ऽकामहतः ।

## pM37

pro m32-42, schribitkrishna 33-36; vide infra
अ॒थ ये॒ श॒तं देवलो॒क आनन्दाः॒,
स॒ ए॒को गन्धर्वलो॒क आनन्दो॒,
य॒श्च [+]+[/+]श्रो॒त्रियोऽवृजिनो॒ऽकामहतः ।

## pM38

pro m32-42, schribitkrishna 33-36; vide infra
अ॒थ ये॒ श॒तं गन्धर्वलो॒क आनन्दाः॒,
स॒ ए॒कः प्रजापतिलो॒क आनन्दो॒,
य॒श्च [+]+[/+]श्रो॒त्रियोऽवृजिनो॒ऽकामहतः ।

## pM39

pro m32-42, schribitkrishna 33-36; vide infra
अ॒थ ये॒ श॒तं प्रजापतिलो॒क आनन्दाः॒,

स एको ब्रह्मलोक आनन्दो,
यश्च [+]+[/+]श्रोत्रियोऽवृजिनोऽकामहत ।
एष ब्रह्मलोकः,
सम्राड् ।
इति हैनं अनुशशासैतदमृतꣳ ।
सोऽहं भगवते सहस्रं ददामि ।
अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।

pM40

pro m32-42, schribitkrishna 33-36; vide infra
स वा एष एतस्मिन्त्सम्प्रसादे
रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः
प्रतिन्यायं प्रतियोन्य् आद्रवति बुद्धान्तायैव;
स यदत्र किञ्चित्पश्यत्यनन्वागतस् तेन भवति
असङ्गो ह्ययं पुरुष इति ।
एवमेवैतद्
याज्ञवल्क्य ।
सोऽहं भगवते सहस्रं ददामि ।
अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।

pM41

pro m32-42, schribitkrishna 33-36; vide infra
अत्र ह याज्ञवल्क्यो बिभायां चकार ।
मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति ।
स यत्र अणिमानं न्येति
जरया वोपतपता वाणिमानं निगच्छति यथाम्रं
वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्येतैव एवायं
शारिर आत्मैभ्योऽङ्गेभ्यः सप्रमुच्य पुनः प्रतिन्यायं

प्रतियो॒न्य् आ॒द्रवति प्रा॒णा॒यै॒व ।

pM42

pro m32-42, schribitkrishna 33-36; vide infra
त॒द्य॒था॒नः सु॒समाहितमुत्स॒र्जद्या॒या॒देव॒मे॒वा॒यं शारी॒र आत्मा॒
प्रा॒ज्ञे॒नात्म॒नान्वा॒रूढ उत्स॒र्जद्याति ।

pk33

K schribit33-36 pro m32-42; vide supra
स यो मनूष्याणाꣳ राद्धः
समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः सम्पन्नतमः,
स मनुष्याणां परम आनन्दो ।
अथ ये शतं मनुष्याणामानन्दाः,
स एकः पितृणां जितलोकानामानन्दो ।
अथ ये शतं पितृणां जितलोकानामानन्दाः,
स एको गन्धर्वलोक आनन्दो ।
अथ ये शतं गन्धर्वलोक आनन्दाः,
स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते ।
अथ ये शतं कर्मदेवानामानन्दाः,
स एक आजानदेवानामानन्दो,
यश्च श्रोत्रियोऽवृजिनोऽकामहतो ।
अथ ये शतमाजानदेवानामानन्दाः,
स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतो ।
अथ ये शतं प्रजापतिलोक आनन्दाः,
स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतो ।
अथैष एव परम आनन्द एष ब्रह्मलोकः,
सम्राड्,
इति होवाच याज्ञवल्क्यः ।

सोऽहं भगवते सहस्रं ददामि ।
अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।
अत्र ह याज्ञवल्क्यो बिभयां चकारः
मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति ।

pk34

K schribit33-36 pro m32-42; vide supra
स वा एष एतस्मिन्त्स्वप्नान्ते
रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं
प्रतियोन्य् आद्रवति बुद्धान्तायैव ।

pk35

K schribit33-36 pro m32-42; vide supra
तद्यथानः सुसमाहितमुत्सर्जं यायादेवमेवायं शारीर
आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जं याति यत्रैतदूर्ध्वोच्छ्वासी भवति ।

pk36

K schribit33-36 pro m32-42; vide supra
स यत्रायमणिमानं न्येति जरया वोपतपता वाणिमानं निगच्छति,
तद्यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत,
एवमेवायं पुरुष एभ्योऽङ्गेभ्यः सम्प्रमुच्य
पुनः प्रतिन्यायं प्रतियोन्य् आद्रवति प्राणायैव ।

pM43/k37

तद्यथा राजानमायन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः
पानैरवसथैः प्रतिकल्पन्तेः
अयमायात्ययमागच्छतीति
एवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्तः
इदं ब्रह्मायातीदमागच्छतीति ।

pM44/k38

तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः
सूतग्रामण्य उपसमायन्त्य्

krishna.abhisamAyanty
एवम्हैवंविदं

K evamevemamAtmAnamantakAle
सर्वे प्राणा उपसमायन्ति

kabhisamAyanti
यत्रैतदूर्ध्वोच्छ्वासी भवति ।

ch4 = hbM 14.7.2 = hbk16.6.4

pMk1

स यत्रायम्शारिरं

K om.
आत्माबल्यं नीत्य

knyetya
सम्मोहमिव न्येति
अथैनमेते प्राणा अभिसमायन्ति;

स एतास् तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति ।

pM2/k1

स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्तते,
अथारूपज्ञो भवति ।

pM2/k2

एकीभवति न पश्यतीत्य् आहुः
एकीभवति न जिघ्रतीत्य् आहुः
एकीभवति न रसयतीत्य् आहुः
एकीभवति न वदतीत्य् आहुः
एकीभवति न शृणोतीत्य् आहुः
एकीभवति न मनुत इत्य् आहुः
एकीभवति न स्पृशतीत्य् आहुः
एकीभवति न विजानातीत्य् आहुः ।

pM3/k2

तस्य हैतस्य हृदयस्याग्रं प्रद्योतते;
तेन प्रद्योतेनैष आत्मा निष्क्रामति,
चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः ।
तमुत्क्रामन्तं प्राणोऽनूत्क्रामति,
प्राणमनूत्क्रामन्तँ सर्वे प्राणा अनूत्क्रामन्ति ।
सज्ञानं एवान्ववक्रामति,
स एष ज्ञः सविज्ञानो भवति
तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ।

pM4/k3

तद्यथा तृणजलायुका तृणस्यान्तं गत्वात्मनं

K gatvAnyamAkramamAkramyAtmAnam
उपसꣳहरति
एवमेवायम्पुरुष इदं

K AtmedaM
शरीरं निहत्याविद्यां गमयित्वात्मनं

kgamayitvAnyamAkramamAkramyAtmAnam
उपसꣳहरति ।

pM5/k4

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्

K upAdAyAnyan
नवतरं कल्याणतरꣳ रूपं तनुत,
एवमेवायम्पुरुष

K AtmA
इदं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं
कल्याणतरꣳ रूपं तनुते

kkurute
पित्र्यं वा गान्धर्वं वा
ब्राह्मं वा प्राजापत्यं वा दैवं वान्येभ्यो वा भूतेभ्यः

kgAndharvaM vA daivaM vA prAjApatyaM vA brAhmaM vAnyeShAM vA bhUtAnAM

pM6/k5

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः

K om.
प्राणमयश्चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्
तेजोमय आपोमयः पृथिवीमयः क्रोधमयोऽक्रोधमयो
हर्षमयोऽहर्षमयः

kShrotramayaH pRithivImaya Apomayo vAyumaya AkAshamayas tejomayo.atejomayaH kAmamayo.akAmamayaH krodhamayo.akrodhamayo
धर्ममयोऽधर्ममयः सर्वमयः ।
तद्यदेदम्मयो

K tadyadetadidammayo
अदोमय इति यथाकारी यथाचारी तथा भवति ।
साधुकारी साधुर्भवति,
पापकारी पापो भवति,
पुण्यः पुण्येन कर्मणा भवति पापः पापेन ।

pM7/k5

अथो खल्वाहुः
काममय एवायं पुरुष इति;
स यथाकामो भवति,
तथाक्रतुर्

K tatkratur
भवति;
यथाक्रतुर्

K yatkratur
भवति,
तत्कर्म कुरुते;
यत्कर्म कुरुते

तदभिसम्पद्यते ।

pM8/k6

तदेष श्लोको भवतिः
तदेव सक्तत्

K saktaH
सह कर्मणैति
लिङ्गं मनो यत्र निषक्तमस्य
प्राप्यान्तं कर्मणस् तस्य
यत्किञ्चेह करोत्ययं
तस्माल् लोकात्पुनरैति
अस्मै लोकाय कर्मण,
इति नु कामयमानो;
अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति

K AptakAma AtmakAmo
न तस्माद्

ktasya
प्राणा उत्क्रामन्ति
अत्रैव समवनीयन्ते

K om. atra ...
ब्रह्मैव सन्ब्रह्माप्येति ।

pM9/k7

तदेष श्लोको भवतिः
यदा सर्वे प्रमुच्यन्ते
कामा येऽस्य हृदि श्रिता
अथ मर्त्योऽमृतो भवत्य्

अत्र ब्रह्म समश्नुत इति ।

pM10/k7

तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता
शयीतैवमेवेदं शरीरं शेते ।
अथायमनस्थिकोऽशरीरः प्राज्ञ आत्मा

K ayamasharIro.amRitaH prANo
ब्रह्मैव लोक

kteja
एव,
सम्राड्,
इति होवाच याज्ञवल्क्यः

K om. iti ...
सोऽहं भगवते सहस्रानि ददामीति होवाच जनको वैदेहः ।

pM11/k8

तदप्य् एते श्लोका

K tadete shlokA bhavanty
अणुः पन्था वितरः

K vitataH
पुराणो;
माꣳ स्पृष्टोऽनुवित्तो मयैव
तेन धीरा अपियन्ति ब्रह्मविद
उत्क्रम्य स्वर्गं लोकमितो विमुक्ताः

K svargaM lokamita UrdhvaM vimuktAH

pM12/k9

तस्मिञ्छुक्लमुत नीलमाहुः
पिङ्गलꣳ हरितं लोहितं चै-
-ष पन्था ब्रह्मणा हानुवित्तस्
तेनैति ब्रह्मवित्तैजसः पुण्यकृच्च

K puNyakRittaijasashcha

pM13/k10

अन्धं तमः प्रविशन्ति
येऽसम्भूतिम्

krishna.avidyAm
उपासते;
ततो भूय इव ते तमो
य उ सम्भूत्याꣳ

K vidyAyAꣳ
रताः ।

pM14/k11

असुर्या

K anandA
नाम ते लोका
अन्धेन तमसावृतास्
ताꣳस् ते प्रेत्यापिगच्छत्य्

abhigachChanty
अविद्वाꣳसोऽबुधा जनाः ।

pM15/k14

तदेव सन्तस् तदु भवामो

K ihaiva santo.atha vidmas tadvayaM

न चेदवेदी

K avedir

महती विनष्टिर्
ये तद्विदुरमृतास् ते भवन्त्य्
अथेतरे दुःखमेवोपयन्ति

K apiyanti

pM16/k12

आत्मानं चेद्विजानीयाद्
अयमस्मीति पुरुषः
किमिच्छन्कस्य कामाय
शरीरमनु सञ्चरेत्

K sa njvaret

pM17/k13

यस्यानुवित्तः प्रतिबुद्ध आत्मा-
-स्मिन्त्सन्देह्ये गहने प्रविष्टः
स विश्वकृत्
स हि सर्वस्य कर्ता
तस्य लोकः,
स उ लोक एव ।

pM18/k15

यदैतमनुपश्यति
अत्मानं देवमञ्जसे-
-शानं भूतभव्यस्य
न तदा विचिकित्सति

K tato vijugupsate

pM19/k17

यस्मिन्पञ्च पञ्चजना
आकाशश्च प्रतिष्ठितस्
तमेव मन्य आत्मानं
विद्वान्ब्रह्मामृतोऽमृतम् ।

pM20/k16

यस्मादर्वाक्संवत्सरो
अहोभिः परिवर्तते
तद्देवा ज्योतिषां ज्योतिर्
आयुर्ह्य् उपासते

K hopAsate
अमृतम् ।

pM21/k18

प्राणस्य प्राणमुत चक्षुषश्चक्षुर्
उत श्रोत्रस्य श्रोत्रमन्नस्यान्नं
मनसो ये मनो विदुः
ते निचिक्युर्ब्रह्म पुराणमग्र्यं

K 19

मनसैवाप्तव्यं

K anudraShTavyaM

नेह नानास्ति किं चन ।

pM22/k19

मृत्योः स मृत्युमाप्नोति

य इह नानेव पश्यति

K 20

मनसैवानुद्रष्टव्यं

K ekadhaivAnudraShTavyam

एतदप्रमयं ध्रुवम् ।

pM23/k20

विरजः पर आकाशाद्

अज आत्मा महान्ध्रुवस्

K 21

तमेव धीरो विज्ञाय

प्रज्ञां कुर्वीत ब्राह्मणो

नानुध्यायाद्बहूञ्छब्दान्

वाचो विग्लापनꣳ हि तद्

इति ।

pM24/k22

स वा अयमात्मा

ksa vA eSha mahAnaja AtmA yo.ayaM vij nAnamayaH prANeShu;

य एषोऽन्तर्हृदय आकाशः

tasmi NChete

सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः

सर्वमिदं प्रशास्ति यदिदं किञ्च

K om. sarvam...

स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्

K add. eSha sarveshvara

एष भूताधिपतिर्

K add. eSha bhUtapAla

एष लोकेश्वर एश लोकपाल

kom. ambo

स सेतुर्विधरण एषां लोकानामसम्भेदाय ।

pM25/k22

तमेतं वेदानुवचनेन

K add. brAhmaNA

विविदिषन्ति,

ब्रह्मचर्येन तपसा श्रद्धया यज्ञेनानाशकेन चैतम्

K brahmacharyena yaj nena dAnena tapasAnAshakenaitam

एव विदित्वा मुनिर्भवति

एतमेव प्रव्राजिनो लोकमीप्सन्तः

K ichChantaH

प्रव्रजन्ति ।

pM26/k22

एतद्ध स्म वै तत्पूर्वे ब्रह्मणा अनुचाना

K om. ambo

विद्वाꣳसः प्रजां न कामयन्तेः

किं प्रजया करिष्यामो येषां नोऽयमात्मायम्लोक इति ।

ते ह स्म पुत्रैषणायाश्च

वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं

चरन्ति;

या ह्य् एव पुत्रैषणा सा वित्तैषणा,

या वित्तैषणा सा लोकैषणोभे

ह्य् एते एषणे एव भवतः ।

pM27/k22

स एष नेति नेत्य् आत्मागृह्यो न हि गृह्यते,

अशीर्यो न हि शीर्यते,

असङ्गोऽसितो न सज्यते न व्यथते

k.asaNgo na hi sajyate,

.asito na vyathate na riShyaty

अतः [+]+[/+]पापमकरवमित्यतः कल्याणमकरवमित्य् उभे-उभे

ह्य् एष

K ubhe u haivaiSha

एते तरति

अमृतः साध्वसाधुनी

K om. amRitaH ...

नैनं कृताकृते तपतः ।

pM28/k23

तदेतदृचाभ्युक्तम्
एष नित्यो महिमा ब्राह्मणस्य
न कर्मणा वर्धते नो कनीयान् ।
तस्यैव स्यात्पदवित्तं विदित्वा
न कर्मणा लिप्यते

K lipyate karmaNA
पापकेनेति ।
तस्मादेवंविच्छान्तो दान्त उपरतस् तितिक्षुः श्रद्धावित्तो

K samAhito
भूत्वात्मन्य् एवात्मानं पश्येत्!

kpashyati
सर्वमात्मानं पश्यति,
सर्वो।आस्यात्मा भवति सर्वस्यात्मा भवति

K om. sarvo ...,

add. nainaM pApmA tarati
सर्वं पाप्मानं तरति,
नैनं पाप्मा तपति,
सर्वं पाप्मानं तपति,
विपापो विरजो विजिघत्सोऽपिपसो

K om. ambo, add..avichikitso
ब्राह्मणो भवति,
य एवं वेद

kom. ya ...,

add. eSha brahmalokaH,
सम्राड्,
एनं प्राप्तोऽसीति होवाच याज्ञवल्क्यः ।

so.ahaM bhagavate videhAndadAmi mAmchApi saha dAsyAyeti

pMk24

स वा एष महानज आत्मान्नादो वसुदानः ।
स यो हैवमेतं महान्तमजमात्मानमन्नादं वसुदानं वेद,
विन्दते वसु

kvasudAno.
विन्दते वसु,

ya evaM veda

pM30/k25

स वा एष महानज आत्माजरोऽमरोऽभयोऽमृतो

krishna.amRito.abhayo
ब्रह्माभयं वै,
जनक,
प्राप्तोऽसीति होवाच याज्ञवल्क्यः

K add.:
सोऽहं भगवते विदेहान्ददामि माम्चापि सह दास्यायेति

K om. so ...

ch5 = hbM 14.7.3 = hbk16.6.4.

pMk1

अथ ह याज्ञवल्क्यस्य द्वे
भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च;
तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव,
स्त्रीप्रज्ञैव तर्हि कात्यायनी ।

सोऽन्यद्वृत्तमुपाकरिष्यमाण

K atha ha yAj navalkyo.anyadvRittamupAkariShyan

pMk2

याज्ञवल्क्योः
मैत्रेयीति होवाच

K maitreyIti hovAcha yAj navalkyaH
प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि ।
हन्त तेऽनया कत्यायन्यान्तं करवाणीति ।

pMk3

सा होवाच मैत्रेयीः
यन्नु म इयं,
भगोः,
सर्वा पृथिवी वित्तेन पूर्णा स्यात्
स्यां न्वहं तेनामृताहो३ नेति ।
नेति होवाच याज्ञवल्क्यो,
यथैवोपकरणवतां जीवितं,
तथैव ते जीवित१ँ स्याद्
अमृतत्वस्य तु नाशास्ति वित्तेनेति ।

pMk4

सा होवाच मैत्रेयीः
येनाहं नामृता स्यां,
किमहं तेन कुर्याम् ।
यदेव भगवान्वेद,

तदेव मे ब्रूहीति ।

pMk5

स होवाच याज्ञवल्क्यः
प्रिया

K add. vai

खलु नो भवती सती,
प्रियमवृतद्

K avRidhad

धन्त खलु

K tarhi

भवति,
तेऽहं तद्वक्ष्यामि,
व्याख्यामि ते;
वाचं तु मे निदिध्यासस्वेति

K add.:

एतद्व्याख्यास्यामि ते;

vyAchakShANasya tu`me nididhyAsasveti
ब्रवितु भगवानिति

K om.

pMk6

स होवाच याज्ञवल्क्यो

K om.

न वा अरे पत्युः कामाय पतिः प्रियो भवति
आत्मनस् तु कामाय पतिः प्रियो भवति;

न वा अरे जायायै कामाय जाया प्रिया भवति
आत्मनस् तु कामाय जाया प्रिया भवति;
न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति
आत्मनस् तु कामाय पुत्राः प्रिया भवन्ति;
न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति
आत्मनस् तु कामाय वित्तं प्रियं भवति;
न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति
आत्मनस् तु कामाय ब्रह्म प्रियं भवति;
न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति
आत्मनस् तु कामाय क्षत्रं प्रियं भवति;
न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति
आत्मनस् तु कामाय लोकाः प्रिया भवन्ति;
न वा अरे देवानां कामाय देवाः प्रिया भवन्ति
आत्मनस् तु कामाय देवाः प्रिया भवन्ति;
न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति
आत्मनस् तु कामाय भूतानि प्रियाणि भवन्ति;
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति
आत्मनस् तु कामाय सर्वं प्रियं भवति
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो,
मैत्रेयि
आत्मनो वा अरे दर्शनेन
श्रवणेन मत्या विज्ञानेनेद१ँ सर्वं विदितम् ।

pMk7

ब्रह्म तं परादाद्
योऽन्यत्रात्मनो वेदान्वेद;
वेदास् तं परादुः
योऽन्यत्रात्मनो वेदान्वेद;
यज्ञास् तं परादुः
योऽन्यत्रात्मनो यज्ञान्वेद

K add.:
योऽन्यत्रात्मनो ब्रह्म वेद;
क्षत्रं तं परादाद्
योऽन्यत्रात्मनः क्षत्रं वेद;
लोकास् तं परादुः
योऽन्यत्रात्मनो लोकान्वेद;
देवास् तं परादुः
योऽन्यत्रात्मनो देवान्वेद;
वेदास् तं परादुः

yo.anyatrAtmano vedAnveda
भूतानि तं परादुः
योऽन्यत्रात्मनो भूतानि वेद;
सर्वं तं परादाद्
योऽन्यत्रात्मनः सर्वं वेद;
इदं ब्रह्मेदं क्षत्रमिमे लोका
इमे देवा इमे वेदा इमानि भूतानीदꣳ सर्वं यदयमात्मा ।

pMk8

स यथा दुन्दुभेर्हन्यमानस्य न
बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय,
दुन्दुभेस् तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ।

pM9/k10

स यथा वीणायै वाद्यमानायै
न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय,
वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो ग्र्हीतः ।

pM10/k9

स यथा शङ्खस्य ध्मायमानस्य
न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय,
शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ।

pMk11

स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्ति
एवं वा अरेऽस्य महतो भूतस्य निश्वसितम्

K niHshvasitam

एतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः
पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि
व्याख्याननि दत्तम्

kiShTaM

हुतमाशितं पायितमयं च लोकः
परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि
निश्वसितानि

kniHshvasitAni

pMk12

स यथा सर्वासामपाꣳ समुद्र एकायनम्
एवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनम्
एवꣳ सर्वेषां गन्धानां नासिके एकायनम्
एवꣳ सर्वेषाꣳ रसानां जिह्वैकायनम्
एवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनम्
एवꣳ सर्वेषं शब्दानां श्रोत्रमेकायनम्
एवꣳ सर्वेषाꣳ सङ्कल्पानां मन एकायनम्

kmana ekAyanam
एवꣳ सर्वेषां वेदानां हृदयमेकायनम्
एवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनम्
एवꣳ सर्वेषामध्वनां पादावेकायनम्
एवꣳ सर्वेषामानन्दानामुपस्थ एकायनम्
एवꣳ सर्वेषां विसर्गाणां पायुरेकायनम्
एवꣳ सर्वासां विद्यानाꣳ वागेकायनम्

pMk13

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो
रसघन एव स्याद्

K om.
एवं वा अरे इदं महद्भूतमनन्तमपरं

K are.ayamAtmAnantaro.abAhyaH
कृत्स्नः प्रज्ञानघन एवैतेभ्यो
भूतेभ्यः समुत्थाय तानिऽ एवानुविनयति;
न प्रेत्य सञ्ज्ञास्तीत्यरे ब्रविमीति होवाच याज्ञवल्क्यः ।

pMk14

सा होवाच मैत्रेयि
अत्रैव मा भगवान्मोहान्तमापीपदन्
न वा अहमिमं विजानामीतिः
न प्रेत्य सञ्ज्ञास्तीति

K om. na ...

pM15/k14

स होवाच याज्ञवल्क्यो

K om.

न वा अरेऽहं मोहं ब्रवीमि
अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा,
मात्रासꣳसर्गस् त्वस्य भवति

K om. mAtrAx ...

## pMk16

pro m16-25, K schribit15; vide infra

यद्वै तन्न पश्यति,
पश्यन्वै तद्द्रष्टव्यं न पश्यति;
न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यत्पश्येत् ।

## pMk17

pro m16-25, K schribit15; vide infra

यद्वै तन्न जिघ्रति,
जिघ्रन्वै तद्घ्रतव्यं न जिघ्रति;
न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यज् जिघ्रेत्

## pMk18

pro m16-25, K schribit15; vide infra
यद्वै तन्न रसयति,
विजानन्वै तद्रसं न रसयति;
न हि रसयितू रसाद्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यद्रसयेत् ।

pMk19

pro m16-25, K schribit15; vide infra
यद्वै तन्न वदति,
वदन्वै तद्वक्तव्यं न वदति;
न हि वक्तुर्वचो विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यद्वदेत् ।

pMk20

pro m16-25, K schribit15; vide infra
यद्वै तन्न शृणोति,
शृण्वन्वै तच्छ्रोतव्यं न शृणोति;
न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यच्छृणुयात् ।

pMk21

pro m16-25, K schribit15; vide infra
यद्वै तन्न मनुते,
मन्वानो वै तन्मन्तव्यं न मनुते;
न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यन्मन्वीत ।

pMk22

pro m16-25, K schribit15; vide infra
यद्वै तन्न स्पृशति,
स्पृशन्वै तत्स्प्रष्टव्यं न स्पृशति;
न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यत्स्पृशेत् ।

pMk23

pro m16-25, K schribit15; vide infra
यद्वै तन्न विजानाति,
विजानन्वै तद्विज्ञेयं न विजानाति;
न हि विज्ञातुर्विज्ञानाद्विपरिलोपो विद्यतेऽविनाशित्वान्
न तु तद्द्वितीयमस्ति,
ततोऽन्यद्विभक्तं यद्विजानीयात् ।

pM24

pro m16-25, K schribit15; vide infra
यत्र वा अन्यदिव स्यात्
तत्रऽन्योऽन्यत्पश्येद्
अन्योऽन्यज् जिघ्रेद्
अन्योऽन्यद्रसयेद्
अन्योऽन्यद्वदेद्
अन्योऽन्यच्छृणुयाद्
अन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेद्
अन्योऽन्यद्विजानीयात् ।

pM25

pro m16-25, K schribit15; vide infra
यत्र त्वस्य सर्वमात्मैवाभूत्
तत्केन कं पश्येत्
तत्केन कं जिघ्रेत्
तत्केन कꣳ रसयेत्
तत्केन कमभिवदेत्
तत्केन कं शृणुयात्
तत्केन कं मन्वीत,
तत्केन कꣳ स्पृशेत्
तत्केन कं विजानीयाद् ।
येनेदꣳ सर्वं विजानाति,
तं केन विजानीयाद् ।
विज्ञातारमरे केन विजानीयादित्य् उक्तानुशासनासि,
मैत्रेयि
एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो प्रवव्रज ।

pk15

K schribitpro m24-25; vide supra
यत्र हि द्वैतमिव भवति,
तदितर इतरं पश्यति,
तदितर इतरं जिघ्रति,
तदितर इतरꣳ रसयति,
तदितर इतरमभिवदति,
तदितर इतरꣳ शृणोति,
तदितर इतरं मनुते,
तदितर इतरꣳ स्पृशति,
तदितर इतरं विजानाति ।
यत्र त्वस्य सर्वमात्मैवाभूत्
तत्केन कं पश्येत्
तत्केन कं जिघ्रेत्
तत्केन कꣳ रसयेत्
तत्केन कमभिवदेत्
तत्केन कꣳ शृणुयात्
तत्केन कं मन्वीत,
तत्केन कꣳ स्पृशेत्
तत्केन कं विजानीयाद् ।
येनेदꣳ सर्वं विजानाति,
तं केन विजानीयात् ।
स एष नेति नेत्य् आत्मागृह्यो न हि गृह्यते,
अशीर्यो न हि शीर्यते,
असङ्गो न हि सज्यते,
असितो न व्यथते न रिष्यति ।
विज्ञातारमरे केन विजानीयादित्य् उक्तानुशासनासि,
मैत्रेयि
एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ।
[पनुस्तुब्]

pM26

pro m5,26-28, schribitkrishna 6; vide infra
अथ वꣳशः ।
तदिदं वयं
हौर्पणाय्याच्,
छौर्पणय्यो गौतमाद्
गौतमो वत्स्याद्
वत्स्यो वात्स्याच्च पाराशर्याच्च,
पाराशर्यः षाङ्कृत्याच्च भारद्वाजाच्च,
भारद्वाज औदावहेश्च हाण्डिल्याच्च,
हाण्डिल्यो वैजवापाच्च गौतमाच्च,
गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च,
वैष्टपुरेयः हाण्डिल्याच्च ꣡रौहिणायनाच्च,
꣡रौहिणायनः हौनकाच्च जैवन्तायनाच्च ꣡रैभ्याच्च,
꣡रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च,
कौण्डिन्यायनः कौण्डिन्याभ्यां,
कौण्डिन्या और्णवाभेभ्यः,
और्णवाभाः कौण्डिन्यात्
कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च,

pM27

pro m5,26-28, schribitkrishna 6; vide infra
अग्निवेश्यः षौतवात्
षौतवः पाराशर्यात्
पाराशर्यो जातुकर्ण्यात्
जातुकर्ण्यो भारद्वाजाद्
भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च,
गौतमो भारद्वाजाद्

भारद्वाजो वलाकाकौशिताद्
वलाकाकौशितः काषायणात्
काषायणः षौकरायनात्
षौकरायनस् त्रैवणेः
त्रैवणिराउपजन्धनेः
आउपजन्धनिर्षायकायनात्
षायकायनः कौशिकायनेः,
कौशिकायनिर्घृतकौशिकाद्
घृतकौशिकः पाराशर्यात्
पाराशर्यः पाराशर्यात्
पाराशर्यः जातुकर्ण्यात्
जातुकर्ण्यो भारद्वाजाद्
भारद्वाजो भारद्वाजाच्चासुरायणाच्च्यस्काच्च,
असुरायणस् त्रैवणेः
त्रैवणिराउपजन्धनेः
आउपजन्धनिःअसुरेः
असुरिर्भारद्वाजाद्
भारद्वाजो अत्रेयात्

pM28

pro m5,26-28 schribitkrishna 6; vide infra
अत्रेयो माण्टेः,
माण्टिर्गौतमाद्
गौतमो गौतमाद्
गौतमो वात्स्याद्
वात्स्यः हाण्डिल्याच्,
छाण्डिल्यः कैशोर्यात्काप्यात्
कैशोर्यः काप्यः कुमारहरितात्
कुमारहरितो गालवाद्

गालवो विदर्भीकौण्डिन्याद्
विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्
वत्सनपाद्बाभ्रवः पथः सौभरात्
पन्थाः सौभरोऽयास्यादाङ्गिरसाद्
आयास्योऽङ्गिरसऽभुतेस् त्वाष्ट्राद्
आभुतिः त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्
विश्वरूपस् त्वाष्ट्रोऽश्विभ्यां,
आश्विनौ दधिच अथर्वणाद्
दध्यङ्ङ् अथर्वणोऽथर्वणो दैवाद्
आथर्वा दैवोः मृत्योः प्राध्वꣳसनान्
मृत्युः प्राध्वꣳसनः प्राध्वꣳसनान्
प्राध्वꣳसनः एकर्षेः
एकर्षिर्विप्रजित्तेः
विप्रजित्तिर्व्यष्टेः
व्यष्टिः सनारोः,
सनारुः सनातनात्
सनातनः सनगात्
सनगः परमेष्टिणः,
परमेष्टी ब्रह्मणो ।
ब्रह्म स्वयम्भू ब्रह्म नमः ।

chk6

schribitpro m5,26-28

pk1

अथ वꣳशः
पशुतिमाष्यो गौपवनाद्
गौपवनः पशुतिमाष्यात्

पशुतिमाष्यो गौपवनाद्
गौपवनः कौशिकात्
कौशिकः कौण्डिन्यात्
कौण्डिन्यः हाण्डिल्याच्,
छाण्डिल्यः कौशिकाच्च गौतमाच्च,
गौतमो

pk2

अग्निवेश्याद्
अग्निवेश्यो गार्ग्याद्
गार्ग्यो गार्ग्याद्
गार्ग्यो गौतमाद्
गौतमः षैतवात्
षैतवः पाराशर्यायणात्
पाराशार्यायणो गार्ग्यायणाद्
गार्ग्यायण ऊद्दालकायनाद्
ऊद्दालकायनो जाबालायनात्
जाबालायनो माध्यन्दिनायनान्
माध्यन्दिनायनः षौकरायणात्
षौकरायणः काषायणात्
काषायणः षायकायनात्
षायकायनः कौशिकायनेः,
कौशिकायनिः

pk3

घृतकौशिकाद्
घृतकौशिकः प्राशर्यायणात्
पारशर्यायणः पाराशर्यात्

पाराशर्यो जातूकर्ण्यात्
जातूकर्ण्य असुरायणाच्च यास्काच्च,
असुरायणस् त्रैवणेः
त्रैवणिरौपजन्धनेः,
औपजन्धनिरसुरेः,
असुरिर्भारद्वाजाद्
भारद्वाज अत्रेयाद्
अत्रेयो माण्टेः,
माण्टिर्गौतमाद्
गौतमो गौतमाद्
गौतमो वात्स्याद्
वात्स्यः हाण्डिल्याच्,
छाण्डिल्यः कैशोर्यात्काप्यात्
कैशोर्यः काप्यः कुमारहारितात्
कुमारहारितो गालवाद्
गालवो विदर्भीकौण्डिन्याद्
विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्
वत्सनपाद्बाभ्रवः पथः षौभरात्
पन्थाः षौभरोऽयास्यादङ्गिरसाद्
आयास्य अङ्गिरस अभूतेस् द्वाष्ट्राद्
अभूतिस् द्वाष्ट्रो विवरूपात्द्वाष्ट्राद्
विश्वरूपस् द्वाष्ट्रोऽश्वि॒भ्याम्
आश्वि॒नौ डधीच अथर्वणाद्
डध्यङ्ङ् अथर्वणोऽथर्वणो डैवाद्
आथर्वा डैवो मृत्योः प्राध्वꣳसनान्
मृत्यु॒ः प्राध्वꣳसनः प्रध्वꣳसनात्
प्रध्वꣳसन एकर्षेः,
एकर्षिर्विप्रचित्तेः,
विप्रचित्तिर्व्यष्टेः,
व्यष्टिः षनारोः,
षनारुः षनातनात्

षनातनः षनगात्
षनगः परमेष्ठिनः,
परमेष्ठी ब्रह्मणो,
ब्रह्म स्वयम्भु,
ब्रह्मणे नमः ।
[प्रोर्मल्]

ch5 = hbM 14.8 = hbk16.7

ch1

पूर्णमदः,
पूर्णमिदं,
पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय,
पूर्णमेवावशिष्यते ।
खं ब्रह्म,
खं पुराणं,
वायुरं खम्
इति ह स्माह कौरव्यायणीपुत्रो ।
वेदोऽयं,
ब्राह्मणा विदुः
वेदैनेन यद्वेदितव्यम् ।

ch2

pMk1

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुः
देवा मनुष्या असुराः ।

pM2/k1

उषित्वा ब्रह्मचर्यं देवा ऊचुः
ब्रवीतु नो भवानिति ।
तेभ्यो हैतदक्षरमुवाचः
द इति;
व्यज्ञासिष्टा३ इति ।
व्यज्ञासिष्मेति होचुः
दाम्यतेति न आत्थेति ।
ओमिति होवाच,
व्यज्ञासिष्टेति ।

pM3/k2

अथ हैनं मनुष्या ऊचुः
ब्रवीतु नो भवानिति ।
तेभ्यो हैतदेवाक्षरमुवाचः
द इति;
व्यज्ञासिष्टा३ इति ।
व्यज्ञासिष्मेति होचुः
दत्तेति न आत्थेति ।
ओमिति होवाच,
व्यज्ञासिष्टेति ।

pM4/k3

अथ हैनमसुरा ऊचुः
ब्रवीतु नो भवानिति ।
तेभ्यो हैतदेवाक्षरमुवाचः
द इति;
व्यज्ञासिष्टा३ इति ।
व्यज्ञासिष्मेति होचुः
दयध्वमिति न आत्थेति ।
ओमिति होवाच,
व्यज्ञासिष्टेति ।
तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुः
ददद इति;
दाम्यत दत्त दयध्वमिति ।
तदेतत्त्रयꣳ शिक्षेद्
दमं,
दानं,
दयामिति ।

chM3/k om .

वायुरनिलममृतं भस्मान्तꣳ शरीरम् ।
ओ३म्
क्रतो स्मर,
क्लिबे स्मर,
कृतꣳ स्मरा- ।
-ग्ने,
नय सुपथा राये अस्मान्
विश्वानि,
देव,
वयुनानि विद्वान्
युयोध्यस्मज् जुहुराणमेनो
भूयिष्ठां ते नमःउक्तिं विधेम ।

chM4/k3

एष प्रजापतिर्यद्धृदयम्
एतद्ब्रह्मैतत्सर्वम् ।
तदेतत्त्र्यक्षरꣳ:
हृदयमिति ।
हृ इत्य् एकमक्षरम्
अभिहरन्त्यस्मै स्वाश्चान्ये च,
य एवं वेद ।
द इत्य् एकमक्षरम्
ददन्त्य्

K dadaty
अस्मै स्वाश्चान्ये च,
य एवं वेद ।
यमित्य् एकमक्षरम्
एति स्वर्गं लोकं,
य एवं वेद ।

chM5/k4

तद्वै तद्
एतदेव तदास,
सत्यमेव ।
स यो ह एवम्

K om.
एतन्महद्यक्षं प्रथमजं वेदः
सत्यं ब्रह्मेति,
जयतीमाꣳल् लोकान् ।

जित इन्वसावसद्
य एवमेतन्महद्यक्षं प्रथमजं वेदः
सत्यं ब्रह्मेति;
सत्यꣳ ह्य् एव ब्रह्म ।

ch6

pM1/k5,4

आप एवेदमग्र आसुस्;
ता आपः सत्यमसृजन्त,
सत्यं ब्रह्म,
ब्रह्म प्रजापतिं,
प्रजापतिर्देवान् ।

pM2/kch6, p1

ते देवाः सत्यमित्य्

K eva!

उपासते
तदेतत्र्यक्षरꣳ:
सत्यम्

K satiyam

इति ।
स इत्य् एकमक्षरं;
तीत्य् एकमक्षरं,
अम्

K yam

इत्य् एकमक्षरम् ।
प्रथमोत्तमे अक्षरे सत्यं,
मध्यतोऽनृतम्
तदेतदनृतम्

K add. ubhayataH
सत्येन परिगृहीतꣳ सत्यभूयमेव भवति ।
नैवंविद्वाꣳसमनृतꣳ हिनस्ति ।

pM3/k2

तद्यत्तत्सत्यमसौ स आदित्यो ।
य एष एतस्मिन्मण्डले पुरुषो
यश्चायं दक्षिणेऽक्षन्पुरुषः
तावेतावन्योऽन्यस्मिन्प्रतिष्ठितौ;
रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः,
प्राणैरयममुष्मिन् ।
स यदोत्क्रमिष्यन्भवति,
शुद्धमेवैतन्मण्डलं पश्यतिः
नैनमेते रश्मयः प्रत्यायन्ति ।

pM4/k3

य एष एतस्मिन्मण्डले पुरुषः
तस्य भूरिति शिरः
एकꣳ शिर,
एकमेतदक्षरं;
भुव इति बाहूः
द्वौ बाहू,
द्वे एते अक्षरे;
स्वरिति प्रतिष्ठाः

द्वे प्रतिष्ठे द्वे एते अक्षरे ।
तस्योपनिषदहरिति ।
हन्ति पाप्मानं जहाति च,
य एवं वेद ।

pM5/k4

अथ

K om.
योऽयं दक्षिणेऽक्षन्पुरुषः
तस्य भूरिति शिरः
एकꣳ शिर,
एकमेतदक्षरं;
भुव इति बाहूः
द्वौ बाहू,
द्वे एते अक्षरे;
स्वरिति प्रतिष्ठाः
द्वे प्रतिष्ठे,
द्वे एते अक्षरे ।
तस्योपनिषदहमिति ।
हन्ति पाप्मानं जहाति च,
य एवं वेद ।

ch7

विद्युद्ब्रह्मेत्य् आहुः ।
विदानाद्विद्युद्;
विद्यत्य् एनं पाप्मनो,
य एवं वेदः
विद्युद्ब्रह्मेति ।

विद्युद्ध्य् एव ब्रह्म ।

chM8/k6

मनोमयोऽयं पुरुषो,
भाःसत्यः
तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो
वैवमयमन्तरात्मन्पुरुषः

K om. evam...
स एष सर्वस्य वशी

K om.
सर्वस्येशानः,
सर्वस्याधिपतिः;
सर्वमिदं प्रशास्ति यदिदं किङ्च,
य एवं वेद

K om.

chM9/k8

वाचं धेनुमुपासीत ।
तस्याश्चत्वारः स्तनाः
स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः ।
तस्यै द्वौ स्तनौ देवा उपजीवन्ति,
स्वाहाकारं च वषट्कारं च;
हन्तकारं मनुष्याः,
स्वधाकारं पितरः ।
तस्याः प्राण ऋषभो,
मनो वत्सः ।

## chM10/k9

अयमाग्निर्वैश्वानरो योऽयमन्तः पुरुषे,
येनेदमन्नं पच्यते यदिदमद्यते ।
तस्य एष घोषो भवति,
यमेतत्कर्णावपिधाय शृणोति ।
स यदोत्क्रमिष्यन्भवति,
नैनं घोषꣳ शृणोति ।

## ch11

एतद्वै परमं तपो यद्व्याहितस् तप्यते;
परमꣳ हैव लोकं जयति,
य एवं वेदैतद्वै परमं
तपो यं प्रेतमरण्यꣳ हरन्ति;
परमꣳ हैव लोकं जयति,
य एवं वेदैतद्वै परमं
तपो यं प्रेतमग्नावभ्यादधति;
परमꣳ हैव लोकं जयति,
य एवं वेद ।

## chM12/k10

यदा वै पुरुषोऽस्माल् लोकात्प्रैति,
स वायुमागच्छति;
तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं;
तेन स ऊर्ध्व आक्रमते ।
स आदित्यमागच्छति;
तस्मै स तत्र विजिहीते यथाडम्बरस्य

K alambarasya

खं;
तेन स ऊर्ध्व आक्रमते ।
स चन्द्रमसमागच्छति;
तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं;
तेन स ऊर्ध्व आक्रमते ।
स लोकमागच्छत्यशोकमहिमं;
तस्मिन्वसति शाश्वतीः समाः ।

chM13/k12

pMk1

अन्नं ब्रह्मेत्य् एक आहुः ।
तन्न तथा,
पूयति वा अन्नमृते प्राणात् ।
प्राणो ब्रह्मेत्य् एक आहुः ।
तन्न तथा,
शुष्यति वै प्रण ऋतेऽन्नाद् ।
एते ह त्वेव देवते,
एकधाभूयं भूत्वा,
परमतां गच्छतः ।

pM2/k1

तद्ध स्माह प्रातृदः पितरम्
किꣳ स्विदेवैवंविदुषे साधु कुर्यां,
किमेवास्मा असाधु कुर्यामिति ।
स ह स्माह पाणिनाः
मा,

प्रातृद,
क॒स् त्वे॒नयोरेकधाभू॒यं भूत्वा॒ परम॒तां गच्छती॒ति ।

pM3/k1

त॒स्मा उ हैत॒दुवाचः
वी॒ति
अ॒न्नं वै॒ वि
अ॒न्ने ही॒मा॒नि स॒र्वाणि भूता॒नि विष्टा॒नि ।
र॒मि॒ति,
प्राणो॒ वै॒ रं॒,
प्राणे॒ ही॒मा॒नि स॒र्वाणि भूता॒नि रता॒नि

K ramante
स॒र्वाणि ह वा॒ अस्मिन्भूता॒नि विशन्ति,
स॒र्वाणि भूता॒नि रमन्ते,
य॒ ए॒वं वे॒द ।

chM14/k13

pMk1

उक्थं॒,
प्राणो॒ वा॒ उक्थं॒,
प्राणो॒ ही॒द॒ꣳ स॒र्वमुत्थाप॒यति ।
उ॒द्धास्मा

K dhasmAd
उक्थवि॒द्वीर॒स् तिष्ठति
उक्थ॒स्य सा॒युज्यꣳ सलोक॒तां जयति,

य एवं वेद ।

pMk2

यजुः,
प्राणो वै यजुः,
प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते ।
युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय,
यजुषः सायुज्यꣳ सलोकतां जयति,
य एवं वेद ।

pMk3

साम,
प्राणो वै साम,
प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि ।
सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते,
साम्नः सायुज्यꣳ सलोकतां जयति,
य एवं वेद ।

pMk4

क्षत्रं,
प्राणो वै क्षत्रं,
प्राणो हि वै क्षत्रम्
त्रायते हैनं प्राणः क्षणितोः ।
प्र क्षत्रमात्रम्

K atram

आप्नोति,
क्षत्रस्य सायुज्यꣳ सलोकतां जयति,

य एवं वेद ।

chM15/k14

pMk1

भूमिरन्तरिक्षं द्यौरित्यष्टाव् ! अक्षराणि
अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम्;
एतदु हैवास्या एतत् ।
स यावदेषु त्रिषु लोकेषु,
तावद्ध जयति योऽस्या एतदेवं पदं वेद ।

pMk2

ऋचो यजूषि सामानीत्यष्टावक्षराणि
अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम्;
एतदु हैवास्या एतत् ।
स यावतीयं त्रयी विद्या,
तावद्ध जयति,
योऽस्या एतदेवं पदं वेद ।

pMk3

प्राणोऽपानो व्यान इत्यष्टावक्षराणि
अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम्;
एतदु हैवास्या एतत् ।
स यावदिदं प्राणि,
तावद्ध जयति,
योऽस्या एतदेवं पदं वेद ।

pM4/k3

अ॒थास्या एत॒देव॒ तु॒रीयं दर्शत॒ं
पद॒ं परो॒रजा य॒ एष॒ त॒पतिः
य॒द्वै॒ च॒तुर्थं त॒त्तु॒रीयं;
दर्शत॒ं पद॒मि॒ति,
दद्दृश॒ इव ह्य् ए॒ष॒ः;
परो॒रजा इ॒ति,
स॒र्वमु ह्य् ए॒वै॒ष॒ रज॒ उप॒र्य्-उपरि त॒पति ।
एव॒ꣳ हैव॒ श्रिया॒ य॒शसा तपति,
यो॒ऽस्या एत॒देव॒ं पद॒ं वे॒द ।

pM5/k4

सै॒षा॒ गायत्र्य् ए॒त॒स्मिꣳस् तु॒रीये
दर्शते॒ पदे॒ परो॒रजसि प्र॒तिष्ठिता;
त॒द्वै॒ त॒त्सत्ये॒ प्र॒तिष्ठिता

K pratiShThitaM

च॒क्षुर्वै॒ सत्य॒ं,
च॒क्षुर्हि॒ वै॒ सत्य॒म्
त॒स्माद्यदि॒दा॒नीं द्वौ॒ विव॒दमानावेया॒तम्
अह॒मद्राक्षम्

K adarsham

अह॒मश्रौषमि॒ति,
य॒ एव॒

K evaM

ब्रूया॒द्
अह॒मद्राक्षम्

K adarsham
इति,
तस्मा एव श्रद्दध्यात्

K shraddadhyAma

pM6/k4

तद्वै तत्सत्यं बले प्रतिष्ठितं;
प्राणो वै बलं;
तत्प्राणे प्रतिष्ठितं;
तस्मादाहुः
बलꣳ सत्यादोजीय इति ।
एवं वेषा गायत्र्यध्यात्मं प्रतिष्ठिता ।

pM7/k4

सा हैषा गयाꣳस् तत्रे;
प्राणा वै गयास्;
तत्प्राणास् तत्रे;
तद्यद्गयाꣳस् तत्रे,
तस्माद्गायत्री नाम ।
स यामेवामूꣳ

K add. sAvitrIm
अन्वाहैषैव सा ।
स यस्मा अन्वाह,
तस्य प्राणास् त्रायते ।

pM8/k5

ताꣳ ह

K add. etAm

एके सावित्रीमनुष्टुभमन्वाहुः
वागनुष्टुब्;
एतद्वाचमनुब्रूम इति ।
न तथा कुर्याद् ।
गायत्रीमेवानुब्रूयाद्

K eva sAvitrIm...

यदि ह वा अपि

K add. evaMvid

बह्विव प्रतिगृह्णाति,
न हैव तद्गायत्र्या एकं चन पदं प्रति ।

pM9/k6

स य इमाꣳस् त्रींल् लोकान्पूर्णान्प्रतिगृह्णीयात्
सोऽस्या एतत्प्रथमं पदमाप्नुयाद्;
अथ यावतीयं त्रयी विद्या,
यस् तावत्प्रतिगृह्णीयात्
सोऽस्या एतद्द्वितीयं पदमाप्नुयाद्;
अथ यावदिदं प्राणि,
यस् तावत्प्रतिगृह्णीयात्
सोऽस्या एतत्तृतीयं पदमाप्नुयाद्;
अथास्या एतदेव तुरीयं दर्शतं पदं,
परोरजा य एष तपति,
नैव केन चनाप्यम्
कुत उ एतावत्प्रतिगृह्णीयात् ।

pM10/k7

तस्या उपस्थानम्
गायत्रि
अस्य् एकपदी द्विपदी त्रिपदी चतुष्पदि
अपदसि,
न हि पद्यसे ।
नमस् ते तुरीयाय दर्शताय पदाय परोरजसेः
असावदो मा प्रापदिति,
यं द्विष्याद्;
असावस्मै कामो मा समर्धीति वा,
न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठते;
अहमदः प्रापमिति वा ।

pM11/k8

एतद्ध वै तज् जनको वैदेहो बुढिलमाश्वतराश्विमुवाचः
यन्नु हो तद्गायत्रीविदब्रूथा,
अथ कथꣳ हस्ती भूतो वहसीति ।
मुखꣳ ह्यस्याः,
सम्राड्,
न विदां चकरेति होवाच ।

pM12/k8

तस्या आग्निरेव मुखं;
यदि ह वा अपि बह्विवाग्नावभ्यादधति,
सर्वमेव तत्सन्दहति ।
एवꣳ हैवैवंविद्
यद्यपि बह्विव पापं करोति

K kurute

सर्वमेव तत्सम्प्साय शुद्धः पूतोऽजरोऽमृतः सम्भवति ।

chk15

add. K
हिरण्मयेन पात्रेण
सत्यस्यापिहितं मुखं;
तत्त्वं,
पूषन्न्
अपावृणु
सत्यधर्माय दृष्टये ।
पूषन्न्
एकर्षे,
यम,
षूर्य,
प्राजापत्य,
व्यूह रश्मीन्
समूह तेजो;
यत्ते रूपं
कल्याणतमं,
तत्ते पश्यामि ।
योऽसावसौ पुरुषः,
सोऽहमस्मि ।
वायुरनिलममृतम्
अथेदं भस्मान्तꣳ शरीरम् ।
क्रतो,
स्मर,
कृतꣳ स्मर,
क्रतो,
स्मर,
कृतꣳ स्मरा- ।
-ग्ने,

नय सुपथा रायेऽस्मान्
विश्वानि,
देव,
वयुनानि विद्वान्;
युयोध्यस्मज् जुहुराणमेनो,
भूयिष्ठां ते नमःउक्तिं विधेम ।

## ch6 = hbM 14.9 = hbk16.8

## chM1/k2

## pMk1

श्वेतकेतुर्ह

k. om.
वा अरुणेयः पञ्चालानां परिषदमाजगाम ।
स आजगाम जैवलं प्रवाहणं परिचारयमाणम् ।
तमुदीक्ष्याभ्युवादः
कुमारा३ इति ।
स भोर्३ इति प्रतिशुश्रावा- ।
-नुशिष्टो न्वसि पित्रेति ।
ओमिति होवाच ।

## pMk2

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता३ इति ।
नेति होवाच ।

वेत्थ

K vettho

यथेमं लोकं पुनरापद्यन्ता३ इति ।
नेति हैवोवाच ।
वेत्थ

K vettho

यथासौ लोक एवं
बहुभिः पुनःपुनः प्रयद्भिर्न सम्पूर्यता३ इति ।
नेति हैवोवाच ।

pM3/k2

वेत्थ

K vettho

यतिथ्यामाहुत्याꣳ हुतायामापः पुरुषवाचो
भूत्वा समुत्थाय वदन्ती३ इति ।
नेति हैवोवाच ।
वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा,
यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते पितृयाणं वा

pM4/k2

अपि हि न ऋषेर्वचः श्रुतम्
द्वे सृती अशृणवं पितॄणाम्
अहं देवानामुत मर्त्यानां;
ताभ्यामिदं विश्वमेजत्समेति
यदन्तरा पितरं मातरं चेति ।
नाहमत एकं चन वेदेति होवाच ।

pM5/k3

अथ हैनं

K om. ha

वसत्योपमन्त्रयां चक्रे ।
अनादृत्य वसतिं कुमारः प्रदुद्राव ।
स आजगाम पितरं,
तꣳ होवाचेति वाव किल
नो भवान्पुरानुशिष्टानवोच इति ।
कथꣳ,
सुमेध इति ।
पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्
ततो नैकं चन वेदेति होवाच

K om. hovAcha

कतमे त इती-
-म इति ह प्रतीकान्य् उदाजहार ।

pM6/k4

स होवाचः
तथा नस् त्वं,
तत,
जानीथा यथा,
यदहं किञ्च वेद,
सर्वमहं तत्तुभ्यमवोचम् ।
प्रेहि तु,
तत्र प्रतीत्य,
ब्रह्मचर्यं वत्स्याव इति ।
भवानेव गच्छत्विति ।

pM7/k4

स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास ।
तस्मा आसनमाहार्योदकं

K AhRityodakam
आहारयां चकाराथ हास्मा अर्घं

karghyaM
चकार ।

pM8/k4

त९ होवाचः
वरं भवते

kbhagavate
गौतमाय दद्म इति ।

pM8/k5

स होवाचः
प्रतिज्ञतो म एष वरो;
यां तु कुमारस्यान्ते वाचमभाषथाः
तां मे ब्रूहीति ।

pM9/k6

स होवाचः
दैवेषु वै,
गौतम,
तद्वरेषु,
मानुषाणां ब्रूहीति ।

pM10/k7

स होवाचः
विज्ञायते ह्यास्ति हिरण्यस्यापात्तं गोअश्वानां
दासीनां प्रवाराणां परिधानानां,
मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति ।
स वै,
गौतम,
तीर्थेनेच्छसा इति
उपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति ।

pM11/k7

स होपायनकीर्ता उवाच

K sa upAyanakIrtyovAsa

pM11/k8

तथा नस् त्वं,
गौतम,
मापराधास्

K aparAdhas
तव च पितामहा,
यथेयं विद्येतः पूर्वं न
कस्मिँश्चन ब्राह्मन उवास;
तां त्वहं तुभ्यं वक्ष्यामिः
को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ।

pM12/k9

असौ वै लोकोऽग्निः
गौतम ।
तस्यादित्य एव समिद्
रश्मयो धूमो,
अहरर्चिश्,
चन्द्रमा अङ्गारा

K disho.aNgArA
नक्षत्राणि

K avAntaradisho
विष्फुलिङ्गाः ।
तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति;
तस्या आहुतेः सोमो राजा सम्भवति ।

pM13/k10

पर्जन्यो वा अग्निः
गौतम ।
तस्य संवत्सर एव समिद्
अभ्राणि धूमो,
विद्युदर्चिः
अशनिरङ्गारा,
ह्रादुनयो विष्फुलिङ्गाः ।
तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं

K add. rAjAnaM
जुह्वति;
तस्या आहुतेर्वृष्टिः सम्भवति ।

pM14/k11

अयं वै लोकोऽग्निः
गौतम ।
तस्य पृथिव्य् एव समिद्
वायुर्

K agnir?
धूमो,
रात्रिरर्चिः
दिशो

K chandramA
अङ्गारा,
अवन्तरदिशो

nakShatrANi
विष्फुलिङ्गाः ।
तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति;
तस्या आहुतेरन्नꣳ सम्भवति ।

pM15/k12

पुरुषो वा अग्निः
गौतम ।
तस्य व्यात्तमेव समित्
प्राणो धूमो,
वागर्चिश्,
चक्षुरङ्गाराः,
श्रोत्रं विष्फुलिङ्गाः ।
तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति;
तस्या आहुते रेतः सम्भवति ।

pM16/k13

योषा वा अग्निः
गौतम ।
तस्या उपस्थ एव समिल्,
लोमानि धूमो,
योनिरर्चिः
यदन्तः करोति,
तेऽङ्गारा,
अभिनन्दा विष्फुलिङ्गाः ।
तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति;
तस्या आहुतेः पुरुषः सम्भवति ।
स जायते

K om.
स जीवति यावज् जीवति
अथ यदा म्रियते,

pM16/k14

अथैनमग्नये हरन्ति ।

pM17/k14

तस्याग्निरेवाग्निर्भवति,
समित्समिद्
धूमो धूमो,
अर्चिरर्चिः
अङ्गारा अङ्गारा,
विष्फुलिङ्गा विष्फुलिङ्गाः ।
तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति;

तस्या आहुतेः पुरुषो भास्वरवर्णः सम्भवति ।

pM18/k15

ते य एवमेतद्विदुः
ये चामी अरण्ये श्रद्धाꣳ सत्यमुपासते,
तेऽर्चिरभिसम्भवन्ति
अर्चिषोऽहः
अह्न आपूर्यमाणपक्षम्
आपूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङ् आदित्य एति,
मासेभ्यो देवलोकं,
देवलोकादादित्यम्
आदित्याद्वैद्युतं;
तान्वैद्युतात्

K vaidyutAn
पुरुषो मानस एत्य ब्रह्मलोकान्गमयति;
ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति ।
तेषां इह

K om.
न पुनरावृत्तिरस्ति

kom.

pM19/k16

अथ ये यज्ञेन दानेन तपसा लोकं

K lokA N
जयन्ति,
ते धूममभिसम्भवन्ति,
धूमाद्रात्रिꣳ,

रात्रेरपक्षीयमाणपक्षम्
अपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति,
मासेभ्यः पितृलोकं,
पितृलोकाच्चन्द्रं;
ते चन्द्रं प्राप्यान्नं भवन्ति;
ताꣳस् तत्र देवा यथा सोमꣳ राजानम्
आप्यायस्व,
अपक्षीयस्वेति
एवमेनाꣳस् तत्र भक्षयन्ति ।
तेषां यदा तत्पर्यवैति
अथेममेवाकाशमभिनिष्पद्यन्त,
आकाशाद्वायुं,
वायोर्वृष्टिं,
वृष्टेः पृथिवीं;
ते पृथिवीं प्राप्यान्नं भवन्ति;

kadd. te punaH puruShAgnau hUyante,
ततो योषाग्नौ जायन्ते ।

lokAnpratyuthAyinas
त एवमेवानुपरिवर्तन्ते ।
अथ य एतौ पन्थानौ न विदुः
ते कीटाः,
पतङ्गा,
यदिदं दन्दशूकम् ।

chM2/k1

pMk1

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद,
ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति ।
प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ।
ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति
अपि च येषां बुभूषति,
य एवं वेद ।

pMk2

यो ह वै वसिष्ठां वेद,
वसिष्ठः स्वानां भवति ।
वाग्वै वसिष्ठा ।
वसिष्ठः स्वानां भवति

K add. api cha yeShAM bubhUShati
य एवं वेद ।

pMk3

यो ह वै प्रतिष्ठां वेद,
प्रतितिष्ठति समे,
प्रतितिष्ठति दुर्गे ।
चक्षुर्वै प्रतिष्ठा;
चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति ।
प्रतितिष्ठति समे,
प्रतितिष्ठति दुर्गे,
य एवं वेद ।

pMk4

यो ह वै सम्पदं वेद,
सꣳ हास्मै पद्यते,
यं कामं कामयते ।
श्रोत्रं वै सम्पच्;
छ्रोत्रे हीमे सर्वे वेदा अभिसम्पन्नाः ।
सꣳ हास्मै पद्यते,
यं कामं कामयते,
य एवं वेद ।

pMk5

यो ह वा आयतनं वेदायतनꣳ स्वानां भवति
आयतनं जनानाम् ।
मनो वा आयतनम् ।
आयतनꣳ स्वानां भवति
आयतनं जनानां,
य एवं वेद ।

pMk6

यो ह वै प्रजातिं वेद,
प्रजायते ह प्रजया पशुभी ।
रेतो वै प्रजातिः ।
प्रजायते

K add. ha

प्रजया पशुभिः
य एवं वेद ।

pMk7

ते हेमे प्राणा,
अहꣳश्रेयसे विवदमाना,
ब्रह्म जग्मुः

K add. taddhochuH

को नो वसिष्ठ इति ।

editio una indicha etkrishna add. taddhovAchaH

यस्मिन्व उत्क्रान्त इदꣳ शरीरं पापियो मन्यते,
स वो वसिष्ठ इति ।

pMk8

वाग्घोच्चक्राम ।
सा संवत्सरं प्रोष्यागत्योवाचः
कथमशकत मदृते जीवितुमिति ।
ते होचुः
यथा कडा

K kalA

अवदन्तो वाचा,
प्राणन्तः प्राणेन,
पश्यन्तश्चक्षुषा,
शृण्वन्तः श्रोत्रेण,
विद्वाꣳसो मनसा,
प्रजायमाना रेतसैवमजीविष्मेति ।
प्रविवेश ह वाक् ।

pMk9

चक्षुर्होच्चक्राम ।
तत्संवत्सरं प्रोष्यागत्योवाचः

कथमशकत मदृते जीवितुमिति ।
ते होचुः
यथान्धा,
अपश्यन्तश्चक्षुषा,
प्राणन्तः प्राणेन,
वदन्तो वाचा,
शृण्वन्तः श्रोत्रेण,
विद्वाꣳसो मनसा,
प्रजायमाना रेतसैवमजीविष्मेति ।
प्रविवेश ह चक्षुः ।

pMk10

श्रोत्रꣳ होच्चक्राम ।
तत्संवत्सरं प्रोष्यागत्योवाचः
कथमशकत मदृते जीवितुमिति ।
ते होचुः
यथा बधिरा,
अशृण्वन्तः श्रोत्रेण,
प्राणन्तः प्राणेन,
वदन्तो वाचा,
पश्यन्तश्चक्षुषा,
विद्वाꣳसो मनसा,
प्रजायमाना रेतसैवमजीविष्मेति ।
प्रविवेश ह श्रोत्रम् ।

pMk11

मनो होच्चक्राम ।
तत्संवत्सरं प्रोष्यागत्योवाचः

कथमशकत मदृते जीवितुमिति ।
ते होचुः
यथा मुग्धा,
अविद्वाꣳसो मनसा,
प्राणन्तः प्राणेन,
वदन्तो वाचा,
पश्यन्तश्चक्षुषा,
शृण्वन्तः श्रोत्रेण,
प्रजायमाना रेतसैवमजीविष्मेति ।
प्रविवेश ह मनः ।

pMk12

रेतो होच्चक्राम ।
तत्संवत्सरं प्रोष्यागत्योवाचः
कथमशकत मदृते जीवितुमिति ।
ते होचुः
यथा क्लीबा,
अप्रजायमाना रेतासा,
प्राणन्तः प्राणेन,
वदन्तो वाचा,
पश्यन्तश्चक्षुषा,
शृण्वन्तः श्रोत्रेण,
विद्वाꣳसो मनसैवमजीविष्मेति ।
प्रविवेश ह रेतः ।

pMk13

अथ ह प्राण उत्क्रमिष्यन्
यथा महासुहयः सैन्धवः पड्वीशशङ्कून्त्संवृहेद्

एवꣳ हैवेमान्प्राणान्त्संववर्ह ।
ते होचुः
मा,
भगव,
उत्क्रमीः
न वै शक्ष्यामस् त्वदृते जीवितुमिति ।
तस्यो मे बलिं कुरुतेति ।
तथेति ।

pMk14

सा ह वागुवाचः
यद्वा अहं वसिष्ठास्मि,
त्वं तद्वसिष्ठोऽसीति ।
चक्षुर्

K chakShuH

infine
यद्वा अहं प्रतिष्ठास्मि,
त्वं तत्प्रतिष्ठो !ऽसीति ।
श्रोत्रं

K shrotraM

infine
यद्वा अहꣳ सम्पदस्मि,
त्वं तत्सम्पदसीति ।
मनो

K mano

infine
यद्वा अहमायतनमस्मि,
त्वं तदायतनमसीति ।

रेतो

K retas

infine
यद्वा अहं प्रजातिरस्मि,
त्वं तत्प्रजातिरसीति ।
तस्यो मे किमन्नं,
किं वास इति ।
यदिदं किञ्चा श्वभ्य,
आ क्रिमिभ्य

K kRimibhya
आ कीटपतङ्गेभ्यः
तत्तेऽन्नम्;
आपो वास इति ।
न ह वा अस्यानन्नं जग्धं भवति,
नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद ।

pM15/k14

तद्विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्ति
अशित्वाचामन्ति
एतमेव तदन्नमनग्नं कुर्वन्तो मन्यन्ते ।
तस्मादेवंविदशिष्यनाचमेद्
अशित्वाचमेद् ।
एतमेव तदनमनग्नं कुरुते

K om. tasmAd...

ch3

pMk1

स यः कामयतेः
महत्प्राप्नुयामिति
उदगयन आपूर्यमाणपक्षे

K ApUryamANapakShasya
पुण्याहे,
द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कꣳसे चमसे
वा सर्वौषधं फलानीति सम्भृत्य,
परिसमुह्य,
परिलिप्याग्निमुपसमाधायावृताज्यꣳ

K upasamAdhAya, paristIryAvRitAjyaꣳ
सꣳस्कृत्य,
पुꣳसा नक्षत्रेण मन्थꣳ सन्नीय,
जुहोतिः

pM2/k1

यावन्तो देवास् त्वयि,
जातवेदः
तिर्यञ्चो घ्नन्ति पुरुषस्य कामान्
तेभ्योऽहं भागधेयं जुहोमि,
ते मा तृप्ताः

K add. sarvaiH
कामैस् तर्पयन्तु,
स्वाहा ।

pM3/k1

या तिरश्ची निपद्यसेः
अहं विधरणी इति,
तां त्वा घृतस्य धारया
यजे सꣳराधनीमहꣳ ।
स्वाहा ।
प्रजायते न त्वदेतान्यन्य इति
तृतीयं जुहोति।

K om. prajAyate ...

pM4/k2

ज्येष्ठाय स्वाहा,
श्रेष्ठाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
प्राणाय स्वाहा,
वसिष्ठायै स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
वाचे स्वाहा,
प्रतिष्ठायै स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
चक्षुषे स्वाहा,
सम्पदे स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
श्रोत्राय स्वाहायतनाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।

मनसे स्वाहा,
प्रजात्यै स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
रेतसे स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।

pM5

K 3, variato ordine; vide infra
भूताय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
भविष्यते स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
विश्वाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
सर्वाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
पृथिव्यै स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
अन्तरिक्षाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
दिवे स्वाहेति

अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।
दिग्भ्य॒ः स्वा॒हे॒ति
अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।
ब्र॒ह्मणे स्वा॒हे॒ति
अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।
क्षत्रा॒य स्वा॒हे॒ति
अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।

## pM7

K 3, variato ordine; vide infra
भू॒ः स्वा॒हे॒ति
अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।
भु॒वः स्वा॒हे॒ति
अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।
स्व॒ः स्वा॒हे॒ति
अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।
भू॒र्भु॒वः स्वा॒हे॒ति
अग्नौ॒ हुत्वा॒,
म॒न्थे सꣳस्रव॒म॒वनयति ।

## pM8

K 3, variato ordine; vide infra
अग्नये स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
सोमाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
तेजसे स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
श्रियै स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
लक्ष्म्यै स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
सवित्रे स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
सरस्वत्यै स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
विश्वेभ्यो देवेभ्यः स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
प्रजापतये स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।

pk3

K schribitpro m5-8; vide supra
अग्नये स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
सोमाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
भूः स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
भुवः स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
स्वः स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
भूर्भुवः स्वः स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
ब्रह्मणे स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
क्षत्राय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
भूताय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
भविष्यते स्वाहेति

अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
विश्वाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
सर्वाय स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।
प्रजापतये स्वाहेति
अग्नौ हुत्वा,
मन्थे सꣳस्रवमवनयति ।

pM9/k4

अथैनमभिमृशतिः
भ्रम्

K bhramad
असि,
ज्वलदसि,
पूर्णमसि,
प्रस्तब्धमसि
एकसभमसि,
हिङ्कृतमसि,
हिङ्क्रियमानमसि
उद्गीथमसि
उद्गीयमानमसि,
श्रावितमसि,
प्रत्याश्रावितमसि
आर्द्रे सन्दीप्तमसि,
विभूरसि,

प्रभूरसि,
ज्योतिरसि
अन्नमसि,

K variato ordineH annamasi, jyotirasi
निधनमसि,
संवर्गोऽसीति ।

pM10/k5

अथैनमुद्यच्छति
आमोऽस्य्

K Ama~ sy
आमꣳ हि ते मयि

K mahi
स हि राजेशानोऽधिपतिः,
स माꣳ राजेशनोऽधिपतिं करोत्विति ।

pM11/k6

अथैनमाचामतिः
तत्षवितुर्वरेण्यं
मधु वाता ऋतायते
मधु क्षरन्ति सिन्धवो;
माध्वीर्नः सन्त्वोषधीः ।
भूः स्वाहा ।

pM12/k6

भर्गो देवस्य धीमहि
मधु नक्तमुतोषसो,
मधुमत्पार्थिवꣳ रजो,
मधु द्यौरस्तु नः पिता ।
भुवः स्वाहा ।

pM13/k6

धियो यो नः प्रचोदयाद् ।
मधुमान्नो वनस्पतिः
मधुमाꣳ२ अस्तु सूर्यो,
माध्वीर्गावो भवन्तु नः ।
स्वः स्वाहेति ।
सर्वां च सावित्रीमन्वाह,
सर्वाश्च मधुमतीः सर्वाश्च व्याहृतीर्

K om. sarvAsh ...

अहमेवेदꣳ सर्वं भूयासम् ।
भूर्भुवः स्वः स्वाहेति ।
अन्तत आचम्य,
प्रक्षाल्य पाणी

K pANI prakShAlya

जघनेनाग्निं प्राक्शिराः संविशति ।

pM14/k6

प्रातरादित्यमुपतिष्ठतेः
दिशामेकपुण्डरीकमसि
अहं मनुष्याणामेकपुण्डरीकं भूयासमिति ।
यथेतमेत्य,
जघनेनाग्निमासीनो वꣳशं जपतिः

pM15/k7

तꣳ हैतमूद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन
उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेद्
जायेरञ्छाखाः,
प्ररोहेयुः पलाशानीति ।

pM16/k8

एतमु हैव वाजसनेयो याज्ञवल्क्यो
मधुकाय पैङ्ग्यायान्तेवासिन उक्त्वोवाचापि य एनꣳ
शुष्के स्थाणौ निषिञ्चेद्
जायेरञ्छाखाः,
प्ररोहेयुः पलाशानीति ।

pM17/k9

एतमु हैव मधुकः पैङ्ग्यश्चूडाय

K chUlAya

भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य
एनꣳ शुष्के स्थाणौ निषिञ्चेद्
जायेरञ्छाखाः,
प्ररोहेयुः पलाशानीति ।

pM18/k10

एतमु हैव चूडो

K chUlo
भागवित्तिर्जानकय अयस्थूणायान्तेवासिन

kayaHsthUNAyAntevAsina
उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेद्
जायेरञ्छाखाः,
प्ररोहेयुः पलाशानीति ।

pM19/k11

एतमु हैव जानकिरायस्थूणः

K ayaHsthUNaH
षत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि
य एनꣳ शुष्के स्थाणौ निषिञ्चेद्
जायेरञ्छाखाः,
प्ररोहेयुः पलाशानीति ।

pM20/k12

एतमु हैव षत्यकामो जाबालोऽन्तेवासिभ्य
उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेद्
जायेरञ्छाखाः,
प्ररोहेयुः पलाशानीति ।
तमेतं नापुत्राय वानन्तेवासिने वा ब्रूयात् ।

pM21/k13

चतुरौदुम्बरो भवति
औदुम्बरश्चमस

औदुम्बरः स्रुव
औदुम्बर इध्म,
औदुम्बर्या उपमन्थन्यौ ।

pM22/k13

दश ग्राम्याणि धान्यानि भवन्तिः
व्रीहियवास् तिलमाषा अणुप्रियङ्गवो गोधूमाश्च
मसूराश्च खल्वाश्च खलकुलाश्च;
तान्त्सार्धं पिष्ट्वा दध्ना मधुना घृतेनोपसिञ्चत्य्
K tAnpiShTAndadhani madhuni ghRita upasi Nchaty
आज्यस्य जुहोति ।

ch4

pMk1

एषां वै भूतानां पृथिवी रसः,
पृथिव्या आपो,
अपामोषधय,
ओषधीनां पुष्पाणि,
पुष्पाणां फलानि,
फलानां पुरुषः,
पुरुषस्य रेतः ।

pMk2

स ह प्रजापतिरीक्षां चक्रेः
हन्तास्मै प्रतिष्ठां कल्पयानीति;
स स्त्रियꣳ ससृजे ।
ताꣳ सृष्ट्वाध उपास्तः
तस्मात्स्त्रियमध उपासीत,
श्रीर्ह्य् एशा

K om. shrIr...

स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्
तेनैनामभ्यसृजत ।

pMk3

तस्या वेदिरुपस्थो,
लोमानि बर्हिश्,
चर्माधिषवणे,
समिद्धो मध्यतस् तौ मुष्कौ ।
स यावान्ह वै वाजपेयेन यजमनस्य लोको भवति,
तावानस्य लोको भवति,
य एवं विद्वानधोपहासं चरति;
आ स

K AsAꣳ

स्त्रीणाꣳ सुकृतं वृङ्क्ते ।
अथ य इदमविद्वानधोपहासं चरति
आस्य स्त्रियः सुकृतं वृञ्जते ।

pMk4

एतद्ध स्म वै तद्विद्वानूद्दालक
आरुनिराहैतद्ध स्म वै तद्विद्वान्णाको मौद्गल्य
आहैतद्ध स्म वै तद्विद्वान्कुमारहारित आहः

बहवो मर्या ब्राह्मनायना निरिन्द्रिया
विसुकृतोऽस्माल् लोकात्प्रयन्ति,
य इदमविद्वाꣳसोऽधोपहासं चरन्तीति ।

pM5/k4

बहु वा इदꣳ सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ।

pM5/k5

तदभिमृशेद्
अनु वा मन्त्रयेतः
यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्
यदोषधीरप्यसरद्
यदप,
इदमहं तद्रेत आददे;
पुनर्मामैतु इन्द्रियं,
पुनस् तेजः,
पुनर्भगः;
पुनरग्नयो धिष्ण्या
यथास्थानं कल्पन्तामित्य्
अनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ।

pMk6

अथ यद्य् उदक आत्मानं पश्येत्
तदभिमन्त्रयेतः
मयि तेज इन्द्रियं यशो द्रविणꣳ सुकृतमिति ।

pM7/k6

श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासाः ।
तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत ।

pM7/k7

सा चेदस्मै न दद्यात्
काममेनामपक्रिणीयात्

K avakriNIyAt
सा चेदस्मै नैव दद्यात्
काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेद्
इन्द्रियेन ते यशसा यश आदद,
इत्य्
अयशा एव भवति ।

pk8

add. K
सा चेदस्मै दद्याद्
इन्द्रियेण ते यशसा यश आदधामीति
यशस्विनावेव भवतः ।

pM8/k9

स यामिच्छेत्
कामयेत मेति,
तस्यामर्थं निष्ठाप्य !

K niShThAya
मुखेन मुखꣳ सन्धायोपस्थमस्या अभिमृश्य,

जपेद्
अङ्गादङ्गात्सम्भवसि,
हृदयादधिजायसे;
स त्वमङ्गकषायोऽसि,
दिग्धविद्धामिव मादयेति

K add. imAmamUM mayIti

pM9/k10

अथ यामिच्छेद्
न गर्भं दधीतेति,
तस्यामर्थं निष्ठाप्य

K niShThAya
मुखेन मुखꣳ सन्धायाभिप्राण्यापान्याद्
इन्द्रियेण ते रेतसा रेत आदद,
इत्यरेता एव भवति ।

pM10/k11

अथ यामिच्छेद्
गर्भं दधीतेति,
तस्यामर्थं निष्ठाप्य

K niShThAya
मुखेन मुखꣳ सन्धायापान्याभिप्राण्याद्
इन्द्रियेण ते रेतसा रेत आदधामीति;
गर्भिण्य् एव भवति ।

pM11/k12

aliteH vide infra
अथ यस्य जायायै जारः स्यात्
तं चेद्द्विष्याद्
आमपात्रेऽग्निमुपसमाधाय,
प्रतिलोमꣳ शरबर्हिः स्तीर्त्वा,
तस्मिन्नेताः तिस्रः शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयान्
मम समिद्धेऽहौषीः
अशापराकाशौ त आददे,
असाविति नाम गृभ्णाति
मम समिद्धेऽहौषीः,
पुत्रपशूꣳस् त आददे,
असाविति नाम गृभ्णाति
मम समिद्धेऽहौषीः,
प्राणापानौ त आददे,
असाविति नाम गृभ्णाति
स वा एष निरिन्द्रियो विसुकृदस्माल् लोकाद्द्वैति,
यमेवंविद्ब्राह्मणः शपति ।
तस्मादेवंविच्छ्रोत्रियस्य जायायोपहासं नेच्छेद्;
उत ह्य् एवंवित्परो भवति ।

pk12

m11 aliteH vide supra
अथ यस्य जायायै जारः स्यात्
तं चेद्द्विष्याद्
आमपात्रेऽग्निमुपसमाधाय,
प्रतिलोमꣳ शरबर्हिः स्तीर्त्वा,
तस्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयान्
मम समिद्धेऽहौषीः,

प्राणापानौ त आददे,
असाविति ।
मम समिद्धेऽहौषीः,
पुत्रपशूꣳस् त आददे,
असाविति ।
मम समिद्धेऽहौषीः
अशापराकाशौ त आददे
असाविति ।
मम समिद्धेऽहौषीः
इष्टासुकृते त आददे,
असाविति ।
स वा एष निरिन्द्रियो विसुकृतोऽस्माल् लोकाद्वैति,
यमेवंविद्ब्राह्मणः शपति ।
तस्मादेवंवित्श्रोत्रियस्य दारेण नोपहासमिच्छेद्;
उत ह्य् एवंवित्परो भवति ।

pM12/k13

अथ यस्य जायामार्तवं विन्देत्
त्र्यहं कꣳसे न पिबेदहतवासा;
नैनां वृषलो,
न वृषल्य् उपहन्यात्

K apahanyAt
त्रिरात्रान्त आप्लूय

K Aplutya
व्रीहीनवघातयेत् ।

pM13/k14

स य इच्छेत्
पुत्रो मे गौरो

K shuklo
जायेत,
वेदमनुब्रुवीत,
सर्वमायुरियादिति,
क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्;
ईश्वरौ जनयितवै ।

pM14/k15

अथ य इच्छेत्
पुत्रो मे कपिलः पिङ्गलो जायेत,
द्वौ वेदावनुब्रुवीत,
सर्वमायुरियादिति,
दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्;
ईश्वरौ जनयितवै ।

pM15/k16

अथ य इच्छेत्
पुत्रो मे श्यामो लोहिताक्षो जायेत,
त्रीन्वेदाननुब्रुवीत,
सर्वमायुरियादिति
उदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्;
ईश्वरौ जनयितवै ।

pM16/k17

अथ य इच्छेद्
दुहिता मे पण्डिता जायेत,
सर्वमायुरियादिति,
तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्;
ईश्वरौ जनयितवै ।

pM17/k18

अथ य इच्छेत्
पुत्रो मे पण्डितो विजिगीथः

K vigItaH

समितिङ्गमः शुश्रूषितां वाचं भाषिता जायेत,
सर्वान्वेदाननुब्रुवीत,
सर्वमायुरियादिति,
माꣳसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्;
ईश्वरौ जनयितवाइ ।
अउक्ष्णेण

K aukSheNa

वार्षभेण वा ।

pM18/k19

अथाभिप्रातरेव स्थालीपाकावृताज्यꣳ चेष्टित्वा,
स्थालीपाकस्योपघातं जुहोति
आग्नये स्वाहा-
-नुमतये स्वाहा
देवाय षवित्रे सत्यप्रसवाय स्वाहेति,
हुत्वोद्धृत्य प्राश्नाति ।
प्राश्येतरस्याः प्रयच्छति ।
प्रक्षाल्य पाणी,

उदपात्रं पूरयित्वा,
तेनैनां त्रिरभ्युक्षति
उत्तिष्ठातो,
विश्वावसौ
अन्यामिच्छ प्रफर्व्यम्

K prapUrvyAm
सं जायां पत्या सहेति ।

pM19/k20

अथैनामभिपद्यतेः
अमोऽहमस्मि,
सा त्वꣳ;
सा त्वमसि
अमोऽहꣳ;
सामाहमस्मि
ऋक्त्वं;
द्यौरहं,
पृथिवी त्वम् ।
तावेहि सꣳरभावहै,
सह रेतो दधावहै
पुꣳसे पुत्राय वित्तय इति ।

pM20/k21

अथास्या ऊरू विहापयतिः
विजिहीथां द्यावापृथिवी इति ।
तस्यामर्थं निष्ठाप्य

K niShThAya
मुखेन मुखꣳ सन्धाय,

त्रिरेनामनुलोमामनुमार्ष्टिः
विष्णुर्योनिं कल्पयतु,
त्वष्टा रूपाणि पिंशतु
आसिञ्चतु प्रजापतिः
धाता गर्भं दधातु ते ।
गर्भं धेहि,
षिनीवालि;
गर्भं धेहि,
पृथुष्टुके ।
गर्भं ते आश्विनौ देवाव्
आधत्तां पुष्करस्रजौ ।

pM21/k22

हिरण्यनी

K hiraNmayI

अरणी

याभ्यां निर्मन्थतामाश्विनौ देवौ

K om.

तं ते गर्भꣳ हवामहे,
दशमे मासि सूतवे

K sUtaye

यथाग्निगर्भा पृथिवी,
यथा द्यौर्९न्द्रेण गर्भिणी,
वायुर्दिशां यथा गर्भ,
एवं गर्भं दधामि ते,
असाविति नाम गृह्णाति

K om. nAm̐a ...

pM22/k23

सोष्यन्तीमद्भिरभ्युक्षतिः
यथा वातः

K vAyuH
पुष्करिणीꣳ
समिङ्गयति सर्वत
एवा ते गर्भ एजतु,
सहावैतु जरायुणे-
-न्द्रस्यायं व्रजः कृतः
सार्गलः सपरिश्रयस्;
तम्
ईन्द्र,
निर्जहि
गर्भेण सावराꣳ सहेति ।

pM23/k24

जातेऽग्निमुपसमाधायाङ्क आधाय,
कꣳसे पृषदाज्यꣳ सन्नीय,
पृषदाज्यस्योपघातं जुहोति
अस्मिन्त्सहस्रं पुष्यासम्
एधमानः स्वगृहे

K sve gRihe
अस्योपसद्यां

krishna.asyopasandyAM
मा छैत्सीत्
प्रजया च पशुभिश्च,
स्वाहा ।
मयि प्राणाꣳस् त्वयि मनसा जुहोमि,

स्वाहा ।

## pMk24

यत्कर्मणात्यरीरिचं,
यद्वा न्यूनमिहाकरम्
आग्निस् तत्स्विष्टकृद्विद्वान्त्
स्विष्टꣳ सुहुतं करोतु नः,
स्वाहेति ।

## pM25

pro m25 schribitkrishna 25-26; vide infra
अथास्यायुष्यं करोति दक्षिणं कर्णमभिनिधायः
वाग्वागिति त्रिः ।
अथास्य नामधेयं करोतिः
वेदोऽसीति,
तदस्यैतद्गुह्यमेव नाम स्याद् ।
अथ दधि मधु घृतꣳ
सꣳसृज्यानन्तर्हितेन जातरूपेण प्राशयतिः
भूस् त्वयि दधामि,
भुवस् त्वयि दधामि,
स्वस् त्वयि दधामि;
भूर्भुवः स्वः सर्वं त्वयि दधामीति ।

## pk25

maliteH vide supra
अथास्य दक्षिणं कर्णमभिनिधायः

वाग्वागिति त्रिः ।
अथ,
दधि मधु घृतꣳ सन्नीयानन्तर्हितेन जातरूपेण प्राशयतिः
भूस् ते दधामि,
भुवस् ते दधामि,
स्वस् ते दधामि;
भूर्भुवः स्वः सर्वं त्वयि दधामीति ।

pk26

k; maliteH vide supra
अथास्य नाम करोतिः
वेदोऽसीति ।
तदस्यैतद्गुह्यमेव नाम भवति ।

pM26

K om.
अथैनमभिमृषति
अश्मा भव परशुर्भव हिरण्यमस्रुतं भव;
आत्मा वै पुत्रनामासि ।
स जीव शरदः शतमिति ।

pM27/k28

अथास्य मातरमभिमन्त्रयतः
९डासि मैत्रावरुणी;
वीरे वीरमजीजनथाः

K ajIjanat

सा त्वं वीरवती भव,
यास्मान्वीरवतोऽकरदिति ।

pM28/k27

अथैनं मात्रे प्रदाय स्तनं प्रयच्छतिः
यस् ते स्तनः शशयो यो मयोभूर्
यो रत्नधा वसुविद्यः सुदत्रो,
येन विश्वा पुष्यसि वार्याणि,
षरस्वति,
तमिह धातवे करिति ।

pM29/k28

तं वा एतमाहुः
अतिपिता बताभूः
अतिपितामहो बताभूः ।
परमां बत काष्ठां प्राप श्रिया यशसा ब्रह्मवर्चसेन,
य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ।
[पनुस्तुब्]

pM30

pro m4,30-33, K schribit5; vide infra
अथ वꣳशस्;
तदिदं वयं
भारद्वाजीपुत्राद्
भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्
वात्सीमाण्डवीपुत्रः पाराशरीपुत्राद्
पाराशरीपुत्रो गार्गीपुत्राद्

गार्गीपुत्रः पारशरीकौण्डिनीपुत्रात्
पारशरीकौण्डिनीपुत्रो गार्गीपुत्राड्,
गार्गीपुत्रो गार्गीपुत्राड्,
गार्गीपुत्रो बाडेयीपुत्राद्
बाडेयीपुत्रो मौषिकीपुत्रान्
मौषीकिपुत्रो हारिकर्णीपुत्राद्
ढारिकर्णीपुत्रो भारद्वाजीपुत्राद्
भारद्वाजीपुत्रः पैङ्गीपुत्रात्
पैङ्गीपुत्रः

pM31

pro m4,30-33, K schribit5; vide infra
काश्यपीबालाक्यामाठरीपुत्रात्
काश्यपीबालाक्यामाठरीपुत्रो कौत्सीपुत्रात्
कौत्सीपुत्रो भौधीपुत्राद्
भौधीपुत्रः हालङ्कायनीपुत्राच्,
हालङ्कायनीपुत्रो वार्षमणीपुत्राद्
वार्षमणीपुत्रो गौतमीपुत्राद्
गौतमीपुत्रऽत्रेयीपुत्राद्
अत्रेयीपुत्रो गौतमीपुत्राद्
गौतमीपुत्रो वात्सीपुत्राद्
वात्सीपुत्रो भारद्वाजीपुत्राद्
भारद्वाजीपुत्रः पाराशरीपुत्रात्
पाराशरीपुत्रो वार्कारुणीपुत्रात्
वार्कारुणीपुत्रोऽर्तभागीपुत्रात्
अर्तभागीपुत्रः हौङ्गीपुत्राच्,
छौङ्गीपुत्रः षाङ्कृतिपुत्रात्
षाङ्कृतिपुत्र

## pM32

pro m4,30-33, K schribit5; vide infra
अलम्बीपु॒त्रात्
अलम्बीपु॒त्रऽलम्बायनीपु॒त्रात्
अलम्बायनीपु॒त्रो जा॒यन्तीपु॒त्रात्
जा॒यन्तीपु॒त्रो मा॒ण्डूकायनीपु॒त्रान्
मा॒ण्डूकायनीपु॒त्रो मा॒ण्डूकीपु॒त्रान्
मा॒ण्डूकीपु॒त्रः हा॒ण्डिलीपु॒त्रात्
हा॒ण्डिलीपु॒त्रो ऱा॒थीतरीपु॒त्राद्
ऱा॒थीतरीपु॒त्रो क्रौ॒ङ्चिकीपु॒त्राभ्यां,
क्रौ॒ङ्चिकीपु॒त्रौ वै॒दभृतीपु॒त्राद्
वै॒दभृतीपु॒त्रो भा॒लुकीपु॒त्राद्
भा॒लुकीपु॒त्रः प्रा॒चीनयोगीपु॒त्रात्
प्रा॒चीनयोगीपु॒त्रः षा॒ञ्जीवीपु॒त्रात्
षा॒ञ्जीवीपु॒त्रः का॒र्शकेयीपु॒त्रात्
का॒र्शकेयीपु॒त्रः

## pM33

pro m4,30-33, K schribit5; vide infra
प्रा॒श्नीपु॒त्राद्
असु॒रिवा॒सिनः प्रा॒श्नीपु॒त्र असुराय॒नाद्
असुराय॒ण असु॒रेः
असु॒रिः या॒ज्ञवल्क्याद्
या॒ज्ञवल्क्य ऊद्दा॒लकाद्
ऊद्दा॒लको॒ऽरुणाद्
अरुण ओपवेशेः
ओपवेशिः कु॒श्रेः,
कु॒श्रिर्वाजश्रवसो,

वाजश्रवा जीह्वावतो बाध्योगात्
जीह्वावान्बाध्योगोऽसिताद्वार्षगणाद्
असितो वार्षगणो हरितात्कश्यपाद्
ढरितः कश्यपः हिल्पात्कश्यपाच्,
छिल्पः कश्यपः कश्यपान्णैध्रुवेः,
कश्यपो णैध्रुविर्वाचो,
वागाम्भिण्या,
आम्भिण्य् अदित्याद्
आदित्यानीमानि शुक्लानि यजूँषि वाजसनेयेन
याज्ञवल्क्येनाख्ययन्ते ।

chk5

schribitkrishna pro m4,30-33

pk1

अथ वँशः
पौतिमाषीपुत्रः कात्यायनीपुत्रात्
कात्यायनीपुत्रो गौतमीपुत्राद्
गौतमीपुत्रो भारद्वाजीपुत्राद्
भारद्वाजीपुत्रः पाराशरीपुत्रात्
पाराशरीपुत्र औपस्वस्तीपुत्राद्
औपस्वस्तीपुत्रः पाराशरीपुत्रात्
पाराशरीपुत्रः कात्यायनीपुत्रात्
कात्यायनीपुत्रः कौशिकीपुत्रात्
कौशिकीपुत्र अलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च,
वैयाघ्रपदीपुत्रह् काण्वीपुत्राच्च कापीपुत्राच्च,
कापीपुत्रः

pk2

अत्रेयीपुत्राद्
अत्रेयीपुत्रो गौतमीपुत्राद्
गौतमीपुत्रो भारद्वाजीपुत्राद्
भारद्वाजीपुत्रः पाराशरीपुत्रात्
पाराशरीपुत्रो वात्सीपुत्राद्
वात्सीपुत्रः पाराशरीपुत्रात्
पाराशरीपुत्रो वार्कारुनीपुत्राद्
वार्कारुणीपुत्रो वार्कारुणीपुत्राद्
वार्कारुणीपुत्र अर्तभागीपुत्राद्
अर्तभागीपुत्रः हौङ्गीपुत्राच्,
छौङ्गीपुत्रः षान्कृतीपुत्रात्
षाङ्कृतीपुत्र अलम्बायनीपुत्राद्
अलम्बायनीपुत्र अलम्बीपुत्राद्
अलम्बीपुत्रो जायन्तीपुत्रात्
जायन्तीपुत्रो माण्डूकायनीपुत्रान्
माण्डूकायनीपुत्रो माण्डूकीपुत्रान्
माण्डूकीपुत्रः हाण्डिलीपुत्राच्,
छाण्डिलीपुत्रो र॒थीतरीपुत्राद्
र॒थीतरीपुत्रो भालुकीपुत्राद्
भालुकीपुत्रः क्रौङ्किकीपुत्राभ्यां,
क्रौङ्किकीपुत्रौ वैदभृतीपुत्राद्
वैदभृतीपुत्रः कार्शकेयीपुत्रात्
कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात्
प्राचीनयोगीपुत्रः षाङ्गीवीपुत्रात्
षाङ्गीवीपुत्रः प्राश्नीपुत्रादसुरिवासिनः,
प्राश्नीपुत्र असुरायणाद्
असुरायण असुरेः
असुरिः

pk3

याज्ञवल्क्याद्
याज्ञवल्क्य ऊद्दालकाद्
ऊद्दालकोऽरुणाद्
आरुण ऊपवेशेः
ऊपवेशिः कुश्रेः,
कुश्रिर्वाजश्रवसो,
वाजश्रवा जीह्वावतो बाध्योगात्
जीह्वावान्बाध्योगोऽसिताद्वार्षगणाद्
आसितो वार्षगणो हरितात्कश्यपाद्
ढरितः कश्यपः हिल्पात्कश्यपात्
हिल्पः कश्यपः कश्यपान्णैध्रुवेः,
कश्यपो णैध्रुविर्वाचो,
वागाम्भिण्या,
आम्भिण्य् अदित्याद्;
आदित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्व्यन्ते ।

pk4

षमानमा षाङ्गीवीपुत्रात्
षङ्गिवीपुत्रो माण्डूकायनेः
माण्डूकायनिर्माण्डव्याद्
माण्डव्यः कौत्सात्
कौत्सो माहित्थेः
माहित्थिर्वामकक्षायणाद्
वामकक्षायणः हाण्डिल्याच्,
छाण्डिल्यो वात्स्याद्
वात्स्यः कुश्रेः,
कुश्रिर्यज्ञवचसः ऱाजस्तम्बायनाद्
यज्ञवचा ऱाजस्तम्बायनः टुरात्कावषेयात्

टुरः कावषेयः प्रजापतेः,
प्रजापतिर्ब्रह्मणो;
ब्रह्म स्वयम्भु ।
ब्रह्मणे नमः ।

BrihadAraNyakopaniShad
MAdhyandina-Recension / KANva-Recension
edited by Marcos Albino,
Erlangen 1996-1997;
TITUS version by Jost Gippert,

.. Brihadaranyaka Upanishad with Vedic Accents ..
was typeset using XƎLATEX 0.99996
on November 28, 2016

Please send corrections to *sanskrit@cheerful.com*